No. ३०२ / घ

Title वासवदत्ता टीका तत्त्वदीपिनी

Author जगद्धर:

Extent १४२ पत्र Age सं. १८८४

Subject आख्यायिका (काव्य)

वर्गः ५ नम्बर ३०२ श्री वासवदत्ताकाव्यटीका

श्री ७८

वासवदत्ता गद्यटीका बाबा १७००

पाठकवैद्यनाथस्येदं पुस्तकं

पत्राणि १०८३

वास टी
१

॥श्रीमन्महागणपतयेनमः॥ ॥हरौतातवैकुंठतामामसिद्धौहरेतातकामप्रणाशोस्तिबुद्धौ॥अतस्तौविहायत्वदी
यादिमीनेनतयातेनहेरंबनोदासितव्यं॥१॥नत्वागुरून्गणागुरून्वलोकयटीकाविश्वादिकोशनिवहान्सुविचार्यबुध्या॥
श्रीमान्जगद्धरइमांवितनोतिटीकांगूढार्थबोधनिपुणांभरतादिविज्ञः॥इहखलुनिःप्रत्यूहमीहितफलसिद्ध्यर्थमस्य
र्थमर्थीकविकुलकुमुदबंधुःसुबंधुर्वागधिदेवताकीर्त्तनरूपंमंगलमादौनिबधाति॥करबदरेत्यादि॥सासरस्वतीवाग
धिदेवताजयति॥उत्कर्षेणावर्त्तते॥कीदृशीदेवीदेवनंदेवदिवुक्रीडायांभावेह्यनुतद्योगादशाघचूततोगोरादिङीषु
तेनकांतिमतीत्यर्थः॥साकायत्प्रसादतोयस्याःअनुग्रहात्कवयकाव्यकर्त्तारःअखिलंसमस्तंभुवनतलंभुवनंकर राम
१

बदरसदृशं पश्यंति॥ समस्तभुवनमध्यवर्त्तिपदार्थजातप्रख्याकलनेन हस्तस्थितबदरीफलतुल्यं भुवनतलं मवलोक
यंतीत्यर्थः॥ तत्रशब्दः स्वरूपवचनः तथाचामरः स्वरूपान्तर्द्वयोस्तत्वमिति॥ अतएववचनरचनाचातुर्यंवागधिदेवता
सकाशादाप्यतइतितदीयास्फूर्तिरुचितैवेतिभावः॥ कीदृशाः सूक्ष्ममतयः॥ कुशाग्रबुद्धयः अत्रभगवत्याएवप्रसादोहे
तः॥ युक्तंचैतत्॥ कवयः किंनपश्यंतीतिवचनात्॥ एकोर्थः॥ द्वितीयः॥ सरस्वतिसमुद्रे॥ साइदेवीलक्ष्मीदेवीजयति। जय
युक्ताभवतु॥ साका॥ यस्याः प्रसादतोऽनुकंपातः॥ कवयोराजानः अखिलंप्रहतंस्निग्धमितियावत्॥ भुवनतलंभूमीमं
डलंअरसदृशंचक्रप्रांततुल्यंप्रतापातिशयात् पश्यंतिउपलभंतेकीदृशंकेरववत्करोराजग्राह्यभागः तद्युक्तंकीदृशाः

वास टी
२

सूक्ष्ममतय सूक्ष्मेपरतात्स्यादौमतयोर्यथांतेतथायुक्तं चेदं॥उपर्युपरिबुद्धीनां चरंतीश्वरबुद्धयइतिवचनात्॥अत्रसदसे
व्यतमचरणाकमलायाः॥कमलायाः प्रसादेनकविलंवृत्तमितितदुत्कीर्तनमुचितमेवेतिभावः॥अः केशवस्तस्य
वधूः ईपुंयोगादाख्यायामितिङीष्॥तृतीयः॥सासरस्वतीनदीविशेषाजयति॥कीदृशीदेवीद्युतिमतीगतिमतीवास
कायतुप्रसादतोयस्याः स्वच्छतातनकवयः नीरपक्षिणाः समस्तंभुवनतलंजलाधःप्रदेशंपश्यंतितिनिरीक्षंतेकेपानीये
वयः पक्षिणाविः पक्षीपक्षीचविनिगद्यतइत्येकाक्षरकोशात्॥कीदृशंभुवनतलंकेरवोजलनशाद्वस्तनदरस्त्रासस
सहशांततुल्यंतुल्यकालमितियावत् यस्मिन्नेवकालेत्रासमस्मिन्नेवकाले॥जलनतलेयत्किंचिदस्तियस्यायंशब्द

राम
२

इतिशंकयाजलतलंनिभालयंतीतिभावः।क्रियाविशेषणंवायद्वा॥करवेराजलशब्देनदरईषत्सदृशंसमायुक्तमि
त्यर्थः।कीदृशाः सूक्ष्ममीनकीटादेमतिर्येषांते॥तथाकुमुद्वयोवाबकादीनांतथात्वंप्रसिद्धमेव॥अत्रसरितांमध्येगंगेवस
रस्वत्यपिपावित्र्यहेतुकीर्तने।तितत्कीर्तनमादौयुज्यतएवेतिभावः।चतुर्थः।सासरस्वतीवाणी॥जयतिपरविजयवतीभ
वतीत्यर्थः।कीदृशीदेवी।व्यवहारवतीविजिगीषावतीवासाकायस्याःप्रसादतःप्रसिद्धार्थंतयाकवयःपंडिताःभुव
नतलंभुवनमध्यवर्त्तिपदार्थजातंअखिलंप्रहतमतिप्रकाशमितियावत्॥पश्यंतिजानंति॥कीदृशंकंसुखंखःशब्दःद
रस्त्रासःतैःसमानंयथास्यात्तथाइतिसुखादिकमवश्यंविदंतितथापदार्थजातमपीतिभावःकीदृशाः।सूक्ष्मासल्पा

बास टी
२
3

मतिर्येषां तेन तथा तादृशा अपीत्यत्रापि रध्याहार्यः॥ भवति ह्येवं अल्पमतयो विविशादवारायां प्रगल्भंते एवेति ग्रंथादौ
वातीप्रशंसा॥ जयतीत्यत्र लोट् प्रयोगे पितत्वं भवत्यनभिधानात्। अप्रयोगादेवाप्रयोग इति न्यायात् ग्राममग्रामादौ
तथादर्शनात्॥ यद्वा जयस्य वर्त्तमानत्वेव विवक्षिता॥ न तु वर्त्तमानकालविहितप्रत्ययेन तत्कालीन एव जयोभिधेय इति
न सर्वदिकजयावगमः स्यादिति। उच्यते। नित्यप्रयुक्तस्य कालत्रयविभागे भविष्यंतीवक्तव्येति भाष्यकारवचनात्
कालसामान्ये लट् यथा स्रवंति नद्यः तिष्ठंति पर्वता इति अत्र यथा कालत्रयेपि स्रवत्वावस्थानयोः सत्ता तथा जय
स्यापीति॥ यद्वा जयस्य बहुत्वाद धुनापि प्रारब्धजयस्यासमाप्तेर्वर्त्तमानत्वेन निर्देशः॥ प्रारब्धक्रियायावदसमा

राम
२

क्षितिस्तावात्कालोपाधिर्वर्तमानत्वेन विवक्षित इति॥ सरस्वती सरिद्भेदे श्रीवाग्देवतयोर्गिरीति विश्वः॥ अरं शीघ्रे रथां
ग च शीघ्रे ऽपुनरत्यर्थवदिति वा॥ प्रसादोनुग्रहस्वास्थ्यदयाकाव्यप्रसत्तिष्विति च॥ कविकाव्यकरे राज्ञि सूरावपि कवि
मित इति च॥ राजग्राह्ये करः स्मृत इति च॥ सरस्वान्सागरे रौव इत्यमरः॥ ध्वनिध्वानरवस्वननाद इति च॥ दरस्त्रासो भीति
र्भीः साध्वसं भयम् इति च॥ ईषदर्थे दरोऽव्ययमिति च॥ जीवनं भुवनं वनमिति च॥ समस्तं प्रहते खिलमिति धरणिः॥ कंशि
रोजलमास्यान्तं कं सुखेऽपि प्रकीर्तितमित्येकाक्षरकोशः॥ १॥ खिन्नोसीत्यादि गोवर्द्धननामकं गिरिं धारयति भगवति
श्रीकृष्णे सति हे इष्टे कृष्ण त्वं तावत्खिन्नोसि खेदवानसि धरणीधरधारणात् अतो मुंशैलं मुंच त्यज धारणेऽशक्य

वास टी
४
५

त्वद्योतनतायैकवचनेन निर्दिशः व यमेव विभ्रमो धारयाम इति वदत्सु भाषमाणेषु गोपेषु सत्सु शिथिलभुजो धरणी
धरधारेणो स्तब्धीकृतबाहुदंडो भगवान् हरिर्जयति उत्कर्षेणावर्द्धतां॥ अत्र वयमिति बहुवचनेन तगोस्वावादकेन
गिरिधारणे सामर्थ्यमाविष्कृतं। कीदृशाः भरेणागौरवेणा भुग्नाः वितताबाहवो येषां ते तथा॥ तादृशेषु गोपेषु
सत्सु हसहन् पूर्वं धरणीधराधारकतया विततबाहवोपि भगवति शिथिलभुजे सति भरभुग्नबाहवो वृत्ता इति भा
वः॥ विकृतिज्ञायेहासः उत्तमस्यैव मंदं वनितं दुक्तं भनेने॥ स्मितं च हसितं चैव उत्तमस्यैव जायते॥ विकाशितकपो
लांतमुत्फुल्लाननलोचनं॥ किंचिल्लक्षितदंताग्रहसितं तद्विदो विदुरिति॥ विभ्रम इति दुर्भ्रमं धारणोत्तटिम राम
४

सिरूपं॥भुग्न इति भुजो कौटिल्ये क्तः॥गोपत्रितियस्य चभावेन भाव लक्षणामिति सप्तमी॥श्री॥कटिनेत्यादि स
दामोदरो भवतः पातुकृष्णो युष्मानु रक्षत्वित्यर्थः॥इति श्रोत्रजनानत्प्रतिकेवेर्वचनं दाम्ना बद्ध उदरे दामो
दरः सकः यस्य वलिविभंगास्त्रिवलिपंक्तयो राजंति कीदृशाः।कटिनतरस्यातिदृढस्य दाम्नाय द्वेष्टनं ते
नयालेखा तस्संदेहं दानुं शीलं येषां ते तथा।कटिनतरत्वेन दाम्नो रेखाया यौवने पि स्थिति ध्वनितं॥अतए
व दामोदरत्वेनाभिधानं।वलिस्त्रिवलिदैत्ययोरिति विश्वः॥२॥इदानीं हरं स्तौति।सजयतीत्यादि।सजय
तिसकः यस्य हिमकरलेखा चंद्रकला चकास्ति शोभते।एतेन विशेषणद्वारा विशेष्यप्रतिपत्तिरितित्या

५ 5

येनह रोत्र ल्लभ्यते इति ध्वनितं केवरजश्शुक्तिरिव कीदृशी रजतशुक्तिः ॥ नयनप्रदीपकज्जलजिह्मया
ल्लतीयाक्षिप्रदीपका। उज्ज्वलग्रहणावीक्ष्या उत्सुकादौ सुकंपन उमयाभवान्यानिहिता समारोपिता श्रु
त्याकज्जलग्रहरोस्त्री ताभो सुकंपं भवत्येवा। उत्सुकादिति भावप्रधानो निर्देशः। ग्रहीतुमिच्छाजिदृ,
क्षाग्रह उपादाने सन्। असांप्रतिक इत्याकारप्रत्ययः॥ लेखावंक्तिः कन्नापश्चेति विश्वः॥४॥ स्व ष्ठ
समाप्तौ बहु विघ्नशंकया बहु मंगलानि कृत्वा सज्जनानुस्तौति। भवतीत्यादि। अधिकमतिशयितं
तं सुभगत्वं सौभाग्यं। सज्जनेस्य भवति॥ अत्र हेतुगर्भ विशेषणमाह विस्तारितेति विस्तारिताः नान

राम
५

श्रुतिपथंनीताः। परेषामन्येषांगुणाः कवितादयोयेनतस्य। उक्तमर्थं दृष्टांतेन दृढयति। वहतीति। हिमकरा
द्योतश्चंद्रः प्रकाशोहिगुणाः रुचिमतिज्ञायितशोभांवहतिकीदृशः विकाशितंकुमुदंयेनतादृशः। प्रकाशोद्योतआ
तपइत्यमरः॥ तदिह निजसौभाग्यसंपदि मज्जनेनयतितव्यमितिभावः। अधुनाश्लोकचतुष्टयेनखलान्निं
दति। विषधरेत्यादि। विषधरत्तोपि सर्पादपि खलो दुर्जनातिविषम इति यद्धि हासः पंडिताः वदंति तन्नमृ
षासत्यमेवेत्यर्थः विषमत्वात्तु दुष्टाशयत्वेनघातकत्वेनच। उक्तमर्थंकृतितः स्फोरयति यदयमिति। य
स्मादयंसर्पोनकुलद्वेषीनकुलद्वेषकः। सपनः पिशुनः। खलः कलद्वेषी वंशादूषकः अत्रशब्दश्लेषेन

रोधामासः। एको हि कुलस्य द्वेषी इतरोन कुलस्य द्वेषीति अविरोधश्च दर्शित एव। बभ्रुर्नकुल इत्यपीत्यमरः
विश्रुतो स्खलत्सूचकाविति च॥६॥ अतिमलिन इति खलानां धीरतिमलिते कर्तव्ये निपुणा॥ अतीवि भवति
दुर्जनमतिर्भेदकार्येऽतिशयकुशला भवतीत्यर्थः। दृष्टांतेनोपपादयति। तिमिरे हीति। हीति यतः कौशि
कानां पेचकानां दृष्टिस्तिमिरेंऽधकारे रूपं शुक्लादिकं वा प्रतिपद्यते लभते गृह्णाति वा पेचकानां तामस
भवनयनप्रियमिति सिद्धांतः॥ नमसि समतितस्यस्वरूपवलाभो विषयलाभश्च भवति। अत्र अतीव शब्दो व्य
यसमुदायत्वेनातिशयवाची। रूपं स्वभावसौंदर्ये शुक्लादिपशुभेदयोरिति विश्वः। पेचके पिचकौशिका इ

तिच॥विध्वस्तेत्यादि॥खलानामतीवमलिनत्वंभवतिअत्रहेतुःविध्वस्ताउन्मूलिताउपहसितावापरेषामन्येषांगु
णाःकवित्वादयोयैस्तेषां।अत्रदृष्टांतमाह।अंतरितेति।सलिलमुचांमेघानामभ्यधिकोऽतिमहान्मलिनिमा
मालिन्यंभवतिकीदृशानांअंतरितशशिरुचांविहितचंद्रदीप्तीनां।अत्रापिशब्दोहेतोएवार्थेवा।चंद्रेतिरोधानेमे
घाअतिश्यामा।अन्यथातुकविशाएवेतिदृष्टमेव।मलिनिमेतिमलिनशब्दादिमनिच्॥८॥हस्तइत्यादि।यथा
यथाखलःअमुंजनंलंघयतिअभिभवतिकीदृशःभूत्यासंपदामलिनोदुःकर्मातथातंपुजनंनिर्मलच्छायंविशु
द्धकांतिंकुरुतेदुर्जनेनसुजनानामनभिभवात्हस्तइवदर्पणानामिवयथाहस्तोभूतिमलिनोभस्मयुक्तोयथा

यथाद्दर्पस्तामादर्शत्वं घययति आक्रामति मर्द्दयतीतियावत्। तथा तथा तमादर्शं निर्मलच्छायं निर्मलकान्तिं कु
रुते। तथेत्यर्थः। भूतिर्भस्मसितसंपदीत्यमरः। दर्पणो मुकुरादर्शौ इति च। छाया सूर्यप्रिया कान्तिरिति च। अनेकं चोप
मेयं॥९॥ इदानीं विक्रमादित्यस्तुतिव्याजेन निजमहिमानमाह। सारसवत्तेत्यादि। विक्रमादित्ये राज्ञि भुवि भू
मौ कीर्त्तिशेषं यशोमात्रावशेषं उपरतिमितियावत्। गतवति सति सा प्रसिद्धा रसवत्ता शृंगारादिरसयोगि
ता विहता विनष्टा। तथा नवकाः नूतनाः अज्ञा इतियावत्। विलसंति माहृशा नूतनकविवर्गो महिमानमाश्र
यते। यद्वा नवका नूतनातरुरा॥ विलसंति धर्मविरोधेनापि विक्तासंकुर्वंति। न थोकः पुरुषः कं जनं नोचरति

नगच्छतिनाभिभवतीतियावत्। अपितु सर्वः सर्वमभिभवत्यर्थः। यद्वा कः पुरुषोऽकूपावंनोचरतिनकुत्रते अपितुस
र्वएव। यद्वा कः पुरुषः कमर्थंनोचरतिनानुतिष्ठति। अपितु मिथ्याभिमानात् सर्वः सर्वत्रप्रगल्भतइतिभावः। अत्रदृष्टा
न्तमाह सरसीति। यथा सरसीनडागे कीर्त्तिशेषं वंकशेष अत्रसरआसीदितिकीर्त्तनशेषं वागतवतिसतिसार
सवत्ताजलयोगितासारसवत्तापद्मवत्तापक्षिविशेषवत्ता वा विहिता भवति। बकाजलपक्षिविशेषाः नक्लिन्तसं
तिनभ्रमंति। कं कः पक्षिविशेषोनोचरति। नभ्रमति मीनादिकं नखादितिवा। तदत्रविक्रमादित्याद्दते मदीप
गुणाग्रहीतारः केचनापिनेतिभावः। सारसं सरसीरुहमित्यमरः। शृंगारादौ जलेरसइतिच। अकं पापेचरो

गे चेति विश्वः अत्र पक्षे अकमिति विग्रहे ॐदिति प्रगृह्य संज्ञा न भवति न द्विधेरनित्यत्वादित्यवधेयं। कीर्त्तनं
कीर्त्तिः भावे स्त्रियां क्तिन्। कीर्त्तिः पंके पशस्य पीति विश्वः। रसो स्यास्तीति रसवान् तस्य भावः रसवत्तेति साधु
ता प्रकारः केकः केकारीति प्रसिद्धः॥१०॥ संप्रति सत्कविकविताप्रशंसाव्याजेन तिं जकवितास्तु वन्नाह। अ
विदितेति। सत्कविभणितिः सत्कविकविता कर्णेषु श्रोत्रेषु मधुधारां माध्वीकप्रवाहं वमति क्षरति। अ
त्रांतर्भूतिइवार्थः। कीदृशी अविदितगुणापि अज्ञातश्लेषादिगुणापि श्रवणमात्रादेव बुदमदहतीति मा
वः। दृष्टांत मिहाह। अनधिगतेति। यतो मालतीमाला अज्ञातगंधापि दृशं नयनं हरति आलोकमात्रा

देवनत्रानुरागजंनिकेतिभावः।विमर्द्दोत्थेपरिमल्लोगंधेजनमनोहरे।गंधमात्रेपिवपरिमलइतिविश्वः
॥११॥कवीनामुत्कर्षेपिसज्जनानुरागोवश्यापेक्षणीयइतिदर्शयन्नाह।गुणिनामितिगुणिनामपिनिजरूपप्र
तिपत्तिरात्मस्वरूपलाभःस्वगौरवमितियावत्।परतएवसज्जनादेवसंभवति।इहदृष्टांतः।यस्मादक्ष्णोर्नि
यनयोःस्वमहिमदर्शनंनिजमहत्वालोकनंमुकुरतलेआदर्शेजायते।संपद्यते।प्रतिपत्तिरूपलाभेस्या
द्गौरवेपिचसंविदीतिविश्वः।मुकरइतिमकिमंडनेउँणादिकउरन्नलोपः।शमोहेमकुरंगतइतियमके
नोक्तेःसाधुताप्रकारेणाचमकुरशब्दोपमितिनिर्णीयते॥११॥प्रकृतमाह।सरस्वतीति।सुबंधुनामाकविः

निर्बंधं वा स्वदत्तास्वं काव्यं च त्रे॥ करोति। कं न वा न॥ वा। कीदृशः सरस्वत्यादत्तः वररूपः प्रसादो यस्मै स तथा॥
यद्वा सरस्वतीदत्तेन वरेण प्रसादः प्रसन्नताय त्रे स तथा। तथा च तिङ्क कवित्व सत्त्वा वागधिदेवतावरत्वेन
सर्वं गुणावत्ता रसवत्ता अलंकारवत्ता निर्द्दोषता च ध्वनिता। उक्तं चेदं सरस्वतीकंठाभरणे। निर्द्दोषं गुणा
वत्काव्यमलंकारैरलंकृतं। रसान्वितं कविः कुर्वन्कीर्त्तिं प्रीतिं च विंदतीति॥ इह काव्यमित्युपलक्षणं॥
पुनः कीदृशः सुजनैकबंधुः साधूनामेकं मित्रं॥ एतेन साधवो मत्कवितां गुणादिरहितामपि मित्रतया
प्यनुग्रहिष्यंतीति भावः पुनुः कीदृशः प्रत्यरेक्षे श्लेषे राराम कृक्षे न बहुनाश्लेष गुणेन युक्तो यः प्रबं

धस्तस्य विन्यासवैदग्ध्यं वचनकौशलं तन्निधिराश्रयः॥ अतेन बहुश्लेषमयनिबंधकर्त्रीं कविताकृतोय
मिति श्लेषमयतास्य ध्वनिता॥ इह च चक्र इति प्रकृते असाधुकर्त्रे परोक्षे लिटः साधुत्वादिहत्वं तथा त्वादिति॥ उच्चे
ते॥ णलुत्तमो वेति ज्ञापकात् कर्त्रे परोक्षेपि लिटः साधुता तथाहि॥ उत्तमपुरुषः कर्तुरपरोक्ष एव भवति लिट् च
कर्तुः परोक्ष एव भवतीति विरोध एतयो तो लिटि नोत्तमपुरुषविधानं ततः कथमिह णलो विकल्पः॥ तथापि
चेत् कृतस्ततोऽवसीयते कर्तुरपरोक्षेपि लिट् प्रत्ययः अन्ये तु ङन्तप्रतिरूपको यं चक्र इति निपातः॥ निपात
त्वादेवानेकार्थ इति करोतीप्रहुः॥ इतरतु आशंसायां भूतवच्चेति आशंसायां लिट् तेन चक्रे कर्तुमाशंसत इ

त्यर्थइत्याहुः॥१३॥अभूदित्यादि चिंतामणिनोमराजाअभूदितिसंबंधः॥अभूतपूर्वः पूर्वंनभूतः सुप्सुपेतिसमासः॥
नतुल्योनपूर्वंवृत्तइत्यर्थः॥अभूताःपूर्वंयस्मात्सतथाचासौचक्रं समूहः चूडामणिःशिरोरत्नंश्रेणिःपंक्तिःश्रेणि
रत्नंवा॥अग्रभागेचपादौचश्रेणिरुक्तामनीषिभिरितिविश्वः॥शाणाकोणाशाणाग्रंकषणंघर्षणं॥चरणान्नखा
मणिरिवेतिउपमानानिसामान्यवचनैरितिसमासः॥हिरण्यस्यवर्णंकशिपुर्भोजनाच्छादने॥आच्छादनेभोज
नेचकशिपुःकथितोद्वयोः॥नद्वयंमिलितंचापिकशिपुर्भाष्यतेक्वचिदितिधरणिः॥स्थूलदानत्वेनलोका
नामाश्चर्यकारीतिभावः॥पक्षेहिरण्यकशिपुर्दैत्यभेदस्तस्यदानंखंडनंदोऽवखंडनइतिधात्वनुसारात्॥

पश्चाद्वहुव्रीहिसमासः॥ नरसिंहेन हिरण्यकशिपुः खंडित इति पुराणवार्त्ता॥ कृतं वसुना धनेन देवतर्पणम मर
प्रीणनं येन स तथा॥ यद्वा कृतं वसूनां ध्रुवादीनां देवानां हरादीनां च तर्पणं प्रीणनं येन स तथा॥ ध्रुवो धरश्च
सोमश्चापश्चैवानिलोऽनलः॥ प्रत्यूषश्च प्रभासश्च इत्यष्टौ वसवः स्मृता इति पुराणं॥ पक्षे वसुदेवोऽस्य जनकः
तस्य तर्पणं प्रीणनं। सौकर्यणा परिश्रमेण समासादितं धरणिमंडलं येन स तथा॥ पक्षे सौकर्येण सूकरकर्मणा॥
समासादितमुन्नीतं धरणिमंडलं भूगोलकं येन स तथा। एकार्णवमग्ना धरा नववराहमूर्त्तिना हरिणोन्नीतेति
पुराणं॥ अत्र सूत्करोतीति सूकरः वृषोदरादौ साधितः॥ शोभनकरः सूकरः अन्येषामपि दृश्यत इति दीर्घत्वे

वास टी
११

वासाधितः॥उभयथापिदंत्यादिना।शुचः करः शूकर इतियद्वानुपारायशोसाधितंतन्नाल्लव्यादित्वबोधकंततः
उभयरूपता।शूकरशाब्दस्य उक्तं चाशकारभेदेतालव्या अपिदंत्याःस्यूःशंबशूकरपांशवइति।शूकरस्यभा
वःकर्मवासोकार्यं।कंसारातिःकृष्णः यशोददनीतियशोदाःस्तुतिपाठकाः आनंदयतीत्यानंदाः॥नदा
दयः।तयोःसमृद्धिः।यद्वायशःकीर्तिःदानंदाःअन्येभ्योपिदद्यतइतिक्विप्।ताभ्यांजनितेआनंदसमृद्धी
येनसतथा।यथासंख्यमत्र।यद्वाजनितायशोदानांवैतालिकादीनामानंदसमृद्धिर्येनयद्वायशश्चदाश्च
आनंदाश्चजनिताएतावदर्थसमृद्धिर्येनपक्षे।यशोदाकृष्णमातानंदस्तत्पिताजनितातयोःसमृद्धिर्येन राम ११

सतथा।यद्वाजनितायशोदाया आनंदसमृद्धिर्येनसतथा। आनकदुंदुभिर्वसुदेवः।संएवानकदुंदुभिरित्यमरः।काव्यं
कविकर्ममाद्याक्षितत्रकृतयत्नःयद्वाकृतकाव्यःकविःतस्यादरोयत्रसतथा॥यद्वाकृतकाव्यश्चासौऽदरश्चेतिताद
शःअदरस्त्रासशून्यः॥पक्षेकाव्यःशुक्रस्तस्मात्कृतातित्रासः॥यद्वाकाव्यापूतनातस्याःदरस्त्रासः॥काव्यंग्रंथेपु
मान्शुक्रेकाव्यास्यात्पूतनामतेतिविश्वः॥सागरशायीसमुद्रेसुप्तःकृष्णःआनंतभोगिभोनेकसुखिनः॥पक्षे
नंतनामाभोगीसर्पः॥भोगश्चाविसुखेस्त्र्यादेरहेश्चफणाकाययोरितिविश्वः॥आशाप्रत्याशाअंतर्हृदयेयस्य
सआशांतःपुरुषः॥तस्याक्षरोऽहिंसकःतस्याभिमतपूरकत्वात्अक्षराइतिक्षुणुहिसायांपचाद्यच्‌ यद्वा॥

वास टी
१२

12

आशांतः स्याशास्वरूपं तस्य रक्षणो रक्षकः तत्पूरकत्वात् ।यद्वा आशांतेभ्यो रक्षणं यस्मात् । यद्वा अशांतम विरतरक्ष
णं यस्मात् ॥ यद्वा आशाया अंतः फलं वांछितं तल्लाभः तस्य रक्षणं यस्मात् ॥ सतथा ॥ पक्षे आशांतः पश्चिमदिक्स्वरू
पं दक्षिणा शा दक्षिणां प्रत्याशा ॥ यद्वा दक्षिणानां पुरुषाणां प्रत्याशा । यद्वा दक्षिणार्थमाशा दक्षिणाशा तत्संपा
दकः ॥ पक्षे दक्षिणा दिक् तद्दत्तं कर्त्री । विंध्यो गिरिर्मेरावमर्षात् रविमार्गमा क्रम्य वर्द्धितुमुद्यतस्ततोगस्त्येनागत्य
प्रार्थितो यद्यावदहं दक्षिणापथान्नागच्छामि तावत्त्वं मा वर्द्धिष्ठा इति सांप्रतमप्यगस्त्यस्तत्रैव तिष्ठतीति पु
राणं । वाहिनी सेना नदी च ॥ समस्तः कृत्यः स्वीयोदासीन साधारणाकरप्रचारो राजग्राह्यभागप्रचारो यस्य यद्वा ॥ राम
१२

मयाल्लभ्यास्सहवर्त्तमानः समः। स एव समकरः कास्तस्य प्रचारो यत्र तथा च सल्लक्ष्मीकः अथ च कामीत्यर्थः॥ समुद्रप
क्षेपि सल्लक्ष्मीकः वडवानलस्तस्य प्रचारो यत्र। तथा च वडवानलवानित्यर्थः॥ यद्वा समं समं सल्लक्ष्मीकं करोतीति स
मकरः॥ एवंभूतः प्रचारः कर्त्तव्यता यस्य॥ पक्षे समकरप्रचारस्तावर्त्तते इति प्रचारः संवरस्तां महतीसेना महासेना॥
पक्षे महासेनः कार्त्तिकेयः। मारो विघ्नः कामश्च मेरुः सुमेरुः विबुधाः विशिष्टपंडिताः॥ पक्षे देवाः विश्वेषां ज
नानां कर्म्म शिल्पादि। पक्षे विश्वकर्मा देवशिल्पी सूर्यो वा॥ विश्वदेवशिल्पी विश्वकर्मा दिवाकर इति विश्वः॥ क्ष
मा उत्सवस्तं ददातीति क्षमादानदायः अनघा नीरचि अनंतीत्यनाः प्राणिनः तेषां प्रियः प्रबोधकारित्वात्॥

वास टी
१३
13

यद्वाक्षरांददातौ।निक्षरादः सचासौवनप्रियश्चेतिनिक्षरादानप्रियः॥यद्वाक्षरोविषुवदादिपर्वसुपदानंतेनप्रियः अ
र्थात्प्रार्थकानां॥यद्वाक्षरांमुहूर्त्तैयद्दानंतेनप्रियः॥तथाचविश्वः।क्षरोव्यापारशून्येतेमुहूर्त्तेह्लवपर्वस्विति॥
पक्षेक्षरादाराविसानप्रियाप्रीतिविपर्ययस्यसनथानकारश्लाघ्योयंनतुनञ्शब्दैःप्रमाणेच।अमानोनाःप्र
तिषेधवचनाइत्येवव॥अतएवानेकयशानेकोकीर्तिरित्यादावप्यनदेवसमाधानं॥गमिकमीकृतनैकनिकृतेत्यादौनेष
धेप्येवं।छायाकांतिःसूर्यवधूश्च।छायासूर्यप्रियाकांतिरित्यमरः॥रविपक्षेस्ववधूसंतापहारिणा।अविरहका
रित्वेनकुसुमकेतुःकंदर्पः॥जनिताविरूढाऽप्रतिरूढासंपद्येनसतथा॥याचकानामभिमतदातेत्यर्थः॥प

राम
१३

क्षेजनितानिरुद्धस्यस्वपुत्रस्यसंपद्येनसनथा॥ कंदर्पेणारत्यामनिरुद्धनामापुत्रोजनितइतिपुराणं॥ रत्यांसुरतेसु
खप्रदः॥ रत्या अनुरागेणावासुखप्रदः सकलकलाकुशलत्वात्॥ पक्षेरतिःकामवधूः॥ विरुद्धालंकारमाह विद्य
त्यादिविद्या अष्टादशानद्धारकः सुमनाः पंडितः शोभनचित्तश्च॥ अंगानिवेदाश्चत्वारोमीमांसान्यायविस्तरः
धर्मशास्त्रंपुराणंचविद्याएताश्चतुर्दश आयुर्वेदोधनुर्वेदोगांधर्वश्चेतितेत्रयः॥ अर्थशास्त्रंचविज्ञेयंविद्या
अष्टादशैवहीतिपुराणं॥ अथचयोविद्याधरोगंधर्वभेदः सकथंसुमनादेवइतिविरोधः॥ अविरोधस्त्वद
र्शितएव॥ अपिसर्वत्रसमुच्चयेविरोधेचा॥ धृतराष्ट्रोधृतराष्ट्रंदेशोयेनसनथा॥ धृतराज्योपिगुणप्रियगुरो

षुत्रास्तेषु प्रियोऽनुरक्तः॥ अथ च योधृतराष्ट्रः सुयोधनादि विनासकृथं गुरोर्भीमे प्रियोऽनुरक्तः। नस्य तद्विरोधि
त्वात्॥ यद्वा योधृतराष्ट्रो जातांधतया ख्यातः स कथं शुक्लादौ गुरौ प्रियः॥ अविरोधश्च दर्शित एव॥ गुरोः प्रधा
नेषु शुक्लादौ गुराः सूदे वृकोदरे इति विश्वः॥ क्षमा शांतिः॥ तदनुगतस्तु घुक्तः शोभन धर्मान्वितश्च॥ अथान्वयः
क्षमान्वितो भूमिस्थः स कथं सुधर्मा देवसभा तदाश्रितो भवतीति विरोधः॥ क्षमा शांतिः क्षमा धरेति
विश्वः॥ स्यात्सुधर्मा देवसभेत्यमरः॥ बृहन्नलोऽर्जुनस्तस्यैवानुभावो यस्य स अंतरं मध्यं नरे सरलोऽकुटि
लः। अथ च यो बृहन्नलो नाम महान्नरा विशेषः न स्वभावः स कथम मध्यं नरे सरलोग्रं थिरहितो भवती

तिविरोधः॥ नलस्य संग्रंथित्वात्। बहन्नलो गुडाकेशनले कौशिकनंदनेइति विश्वः॥ यद्वायो बृहन्नलानुगतो भ
वति सकथं मक्षः सरलोऽभ्यंतरलीनः सरलवृक्षः सरस्थेलेन त्रासत्वं तदभिव्यंजकगंधाद्यभावात्॥ महिषी
कृताभिषेकाया मित्यमरः॥ सुकृतं वृषइतिच॥ अथ च यो महिषीसंभवो महिषः स कथं वृषोत्पादी वृषोत्पाद
कः इति विरोधः॥ अनरत्नो धीरः महानायकः प्रधाननेता॥ अथ च योऽनरत्नोऽहारमध्यगतो भवति स कथं म
हानायकः। नरस्यैव महानायकत्वादिति विरोधः॥ नरत्नो हारमध्यगइत्यमरः॥ नायको नेतरि श्रेष्ठे हार
मध्यमणावपीति विश्वः॥ असाधारणा श्लेषमाहयत्रेति॥ वादेषु नैय्यायकादिवादेषु छलवाक्कलनादि

वास टी
१५
15
।

निग्रहः प्रतिज्ञाहान्यादिपक्षेछलः कपटः। निग्रहः शास्तिः। नास्तिमतिरस्येति। अस्तिनास्तिदिष्टमतिरिति
ठक्॥ नास्तिकः तद्भावो नास्तिकता॥ परलोकाभाववक्तृता सा चार्वाकस्य बौद्धविशेषस्य दर्शन एव। नावाने
वाहि लोकोयं यावानिंद्रियगोचरः इति तस्मिंद्धांतात्। पक्षे नास्तिकता दारिद्र्यं। अनेनेदमुपमुक्तमिति त
स्वामिति कथकः कंठकः स राजनियोगेषु दुष्टः। ननु कंटकः क्षुद्रशत्रुः न द्योगकुत्रापीति कंटकः क्षुद्रशत्रौ।
कर्मस्थानि दूषणोऽद्रिति विश्वः। परिवादो वीणावादनोपायो जनापवादश्च॥ परीवादोऽपवादे स्याद्वीणावा
दनवस्तुनी निमेदितीकरः। खलं धान्यमर्दनभूमिः॥ दुर्जनश्च। द्विजिह्वः सर्पः॥ खलश्च। द्विजिह्वः प्रत राम

१५

त्य

गे पुंसि खले स्यादन्यलिंगके इति रविः॥ संगृह्णीति संग्रहः॥ अहितुंडेन दिव्यतीर्थे तेन दिव्यती त्यादिना टक्॥

आहितुंडिको विषवैद्यः। व्यालग्राह्याहितुंडिक इं मरः॥ करो राजग्राह्यभागो हस्तश्च॥ छेदो विछेदः कर्त्तं

नं च॥ नेत्रं वृक्षादिमलं चक्षुश्च॥ नरमुलाक्षि वस्त्रेषु नेत्रं पथि गुरो रथे इति विश्वः॥ मुनयो वृक्षविशेषाः॥

मनिर्यती गुदी चूतप्रियालागस्त्यकिंशुके इति विश्वः॥ राजा चंद्रो नृपश्च॥ राजा समुद्रनवनीतमानुदा

विनिहारावली॥ निशापतौ क्षत्रिये च राजास्यात् जगतीपतावितिरन्तिः॥ सार्वभौमो दिग्गज विशेषः तेन

योगः संबंधः॥ अन्येषां कुमुदादीनां भवति॥ पक्षे सर्वभूमेश्वरीर इत्यर्थे सर्वभूमि पृथिवी भ्याम णा भावि

स्यणुभावप्रधानो निर्दिष्टः॥ तेनत्सार्वभौमत्वेन योगस्तस्यैव नान्येषामित्यर्थः॥ अग्नितुलासंशुद्धिः अग्निना तुलया
च विशोधनं अथ च अग्नितुलासंशुद्धिः न समाषादिना संशुद्धिः कस्यापि नास्ति॥ सर्वेषामवाच्यत्वनुसूची
सीवनसाधनलोहविकारः। तया भेदः खंडनं सीवनं च। शूलमुदरादिगतपीडाविशेषः॥ तेन भंग आमर्दः॥
वक्षःशूलं दुष्टप्राणिवधोपायः तीक्ष्णाग्रकाष्ठविशेषः तत्र भंग आरोपणं। दुःखेन शास्यत इति दुःशासनः शा
सिदशिधषिमृषिभ्यो युजिति युच्। दुःशासनो दुर्योधनभ्राता तस्य ज्ञानं वक्षोदुष्टशास्तुः। भारतो ग्रंथविशेषः॥
तत्र न दर्शनं न ज्ञानं न ज्ञातं। जलजं पंकजं तस्य करेणापत्रदारणां करपत्रदारणां॥ यद्वा करेणारविकिरणो

नवत्रदारणांदलविकाशनं॥यद्वाकरेणाहस्तेनपत्रछेदनं।यद्वाजलजानांशंखानांकरपत्रेण।क्रकचेनविदारणां।

अथचक्रकचेनविदारणां।खंडनं।छलेत्यादिजलजानामित्यंतंसावधारणां।अपरपार्थिवानांसुराणांस्वरूपाख्याने

ननिंदामाहमहावराह इति।महावराहोविष्णुमूर्तिः।गोत्रायाभूमेरुद्धरणाप्रवृत्त उत्थापनंचिकीर्षुरपिगोत्राणांविं

ध्यादिगिरीणांमुद्दलनमकरोदित्यविरोधः।अथचगोत्रोद्धरणाप्रवृत्तोगोत्रोदलनकारीतिविरोधः।अत्रगोत्रंवं

शः।एवमंन्यत्रापिनामसादृश्येनविरोधउन्नेयः।राघवोरामः।जनकभुवंसीतांपरिहरन्॥जनकभुवासीतयासह

वनंविशेषेतिविरोधः।जनकभुवंपितृभूमिंजनकभुवासीतयेत्यविरोधः।भरतोरामानुजः।रामोराघवः।विरामे।

वास टी

१७ वैराग्यंरामाभावश्चविशब्दोऽभाववाचीविरागादौदृष्टः॥पुनर्भवःपुनरूढायाःपरिग्रहःस्वीकारः॥पुनरक्षतयोनित्वा
दुह्यतेयाययथाविधिः॥सापुनःभूसुतस्तस्याःपौनर्भवउदाहृतइस्मृतिः॥अथचपुनर्भुयोपिभुवःपृथिव्याःपरिग्र
17 हइत्यविरोधः।धृतेनभुवंपरिहृतवतोनत्वस्यपुनर्भूमिपरिग्रहोजातइतिपुराणां॥पृथुर्नृपविशेषः।गोत्रोगिरिवं
शश्च॥गिरिव्यासम्भ्रमिंधनुःकोटिक्षिप्तानुगिरीनुत्कलापृथुर्वर्द्धितवानितिपुराणां।वागवसरः अस्त्येवतेषु
वचनीयतेतिभावः।पूर्वतरराजसुरामादिषु॥रामादिभ्यउद्भावितदोषभ्यएषराजाअन्यएवविलक्ष
णाइत्यर्थः।अतएवतथाहीत्यनेनसाधर्म्यवैधर्म्येप्रदर्शितस्यवैलक्षण्यमाहासराजपवितःउत्सवात् राम

१७

क्षणात् वा कटकसंचारिणः स्कंधावारसंचरणशीलान् गंधर्वीन् अश्वान् सुखयन् तोषयन्न विरराम। न विरक्तः। की
दृशः प्रदर्शिता प्रकाशिता शृंगस्य प्रधानस्य प्रभुत्वस्य वा उन्नतिरुत्कर्षो येन सः। पर्वक्षणरोत घोत्सवे इति धरणिः॥ प्र
भुत्वे पर्वताग्रे च प्रधाने शृंगमुच्यत इति। वाजिवाहार्वगंधर्वहयसैंधवसप्तयः इत्यमरः। यद्वा स कीदृशः। पर्वतः
उत्सव योगी पर्वमरुद्भ्यां तइति मत्वर्थीयस्तप्रत्ययः। पक्षे स पर्वत एव गिरिरिव सोपि प्रकाशिताग्रभागोन्नतिर्नि
तं च संचारिणो गंधर्वान् प्रीणयन्न विरमति। न विरक्तो भवति॥ गायने पशुभेदे च रससिद्धे च खचरे। अंतराभ
वसत्वे स्यात् गंधर्वस्तुरगेपि चेरतिः। सहीत्यादिना समक्षे षंख्यतिरेकमाह॥ सप्रसिद्ध[illegible]हि राद्धैः खल्वर्थे स

खलुमालक्ष्मीस्तस्या आलयस्थानं अवश्यायेन गर्वशानोच्छलितो नोद्धतः। अवश्यायो हिमे गर्वे सततनाङ्गीन
कर्मराजीतिविश्वः नीचगा चरायं गर्वः तदुक्तं भरतेगर्वेतामकुलैश्वर्यरूपविद्यादिकर्मभिः इष्टार्थवि
षयावाप्ते जीयते नीचगाचरे इति। यद्वा न अवश्यायो नावश्याकल्पाभे नोद्धतः नो निषेधे मायायाः कप
टस्य जन्मने उत्पत्त्यै नोहितः नकुशालः अकापटिक इत्यर्थः। पक्षे स हिमालयो नगाधिराजः अवश्या
येन हिमेन नोच्छलितः नउमायागौर्या जन्मने उत्पत्त्यै हितश्चेति विरोधः हिमालयस्य हिमालयत्वाङ्गौ
रीजनकत्वाच्च। श्लेषमात्रमाह। स खलु मीनीचितो नेतिमानृगिरिवाचि स्थितः॥ सत्यसंध इत्यर्थः

राम
१८

पक्षे स हिमालयो नगाधिराजः अवश्यायेन हिमेन नोछलितः न उमाया गौर्या जन्मने उत्पत्त्यै हितश्चेति विरोधः हि
मालयस्य हिमालयत्वाद्गौरीजनकत्वाच्च। श्लेषमात्रमाह॥ स खलु मानी चित्तोन्नतिमान् गिरिवा चिस्थितः॥ सत्यसे
धइत्यर्थः षो धर्मः स एव ध्वजः चिह्नं यस्य स तथा। धार्मिक इत्यर्थः यो यस्य वाहने प्राक्तं स तस्य ध्वज उच्यते इति रुद्रः
पक्षे हिमानी हिमसंहतिस्तत्सन्धानो गिरिर्हिमालयः तत्र स्थित उपविष्टो वृषध्वजो हर इत्यर्थः हिमानी हिमसंह
तिरित्यमरः॥ मानश्चित्तसमुन्नतिरिति वागी वीग्वाणी सरस्वतीति च। पुण्य श्रेयसी सत्कृते वृष इति च। असौ राजा
सतां पुंसां मागतिः स्थाने अवधूता अखिलकान्ताराद्दुर्गमपन्थानो येन स तथा। पुनतीति पावकाः पवित्राः तेष

ग्रेसरः प्रधानतः अतिव विचइ त्यर्थः भोगे बुसक्त्यादिसरवे बुनोत्सु कानोत्मनाः भोगोत्सुकतान्त्पस्यमहदूषरो।तदु
क्तं नितिशास्त्रेमृगयाक्षास्तथापानंगर्हितानि महीक्षितां।दृष्टास्तेभ्यस्त विपदः पांडुनैषधवृष्णिषिति।सुमनो
हरः सुष्टसुंदरः यद्वा।सुमनसः।पंडितान्हरतिगुणाग्रहणादिना ह्लादयति।सुमनोहरः।पक्षेसदागतिर्वातः
कं पितसकलवनः।वह्निसहायः नमसिगंधंनीतिनभोगामेघादयस्तेषामुत्सुकः औत्सुक्यकारी।यद्वातेषांम
ध्येउत्सुकः शीघ्रगः।यद्वागमनंगः धञर्थेकविधानंबाहुलकत्वात्तेनन भोग आकाशगमनेउत्सुकः उन्मनाः
सुमनोहरः परागगंधापहारकः॥आश्रितेषाश्रयोपचारादयंव्यपदेशः वायुर्मीनरिश्चासदागतिरित्यमरःकां

तारः कान्तेन चक्षो दुर्भिक्षेदुर्गेवर्त्मनीति विश्वः ॥ राजपक्षे यावकत्वेप्रमाणां। अस्मिंश्चित्रकपिला सत्रीराजाभिक्षुर्महो
दधिः॥ दृष्टमात्राः पुंत्वं त्यजेत तस्मात्पश्येत नित्यशः इति स्मृतिः। भोगस्त्र्यादि सुखेऽहेः श्वपफणकायोरिति विश्वः। पु
नः श्लिष्टव्यतिरेकमाह। सरत्नाकर इत्यादि। सराजा रत्नानां स्त्रीरत्नादीनामाकरः स्थानं सर्वरत्नानां दर्वो भ
जनमिति वचनात्। जातो जातो यदुत्कृष्टं तद्धि रत्नं प्रचक्षत इति वचनाच्च अहि रिवाहिः क्रूरः सप्रकृतप्रस्ता
वोयत्रसोऽहिमयः तत्प्रकृतवचने मयट् ततथाऽनहिमयः न दुर्जनाश्रित इत्यर्थः॥ कुचिन्न तिमयइतिपाठः
तत्रनतिमयः प्रणातिमयः सज्जनेषु नम्र इत्यर्थः। एतेन गुणित्वमुक्तं। नमं तिफलिनो वृक्षा नमंति गुणिनो जा

नाः। इतिनीतिशास्त्रात्। अनतिमयः प्रचंड इति वा। अगाधो गंभीराशयः। यद्वा नगाधा लिप्सा यस्य स अलुब्ध इत्यर्थः
समयादिः उचितानतिक्रमणशीलः॥ शोकः छिद्रं दीप्तिर्वा। उक्तं तः उत्थितो विशिष्टो वा यो शोकः नो विद्यमानो यस्य
सः। तथा च। अच्छिद्र इत्यर्थः। सदीप्तिरित्यर्थश्च। तथा विस्मयो विगतगर्वः सदा॥ अहिमकराणां तीक्ष्णांशुरूपाणा
माश्रयः। यद्वा सदैव हिमकरवच्चंद्रतुल्य आश्रयो गृहं यस्य सः धवलगृहवानित्यर्थः॥ यद्वा हिमकरस्य कर्पूरस्या
श्रयः आधारः कर्पूरनिधानमित्यर्थः। अमृतमाह्लादकं वस्तु तन्मयः। यद्वा सर्वजनाह्लादकारित्वादमृतरूपः स
पोतः बालकसहितः संतानवानित्यर्थः सपात्र इत्यपि पाठः तत्र पात्राणि महतकादीनि। तस्य क्रोधोऽचलो नास्ति

त्रोधोभूत्वागच्छतीत्यर्थः॥ सकीदृशः॥ महान् महाशयः अदीनो दुर्बलः समुद्रः समुद्राराजचिह्नैस्तैः सहितः॥ यद्वा मु
दं हर्षं राती ति मुद्रा सस्नेवकाः तैस्सहितः पक्षे स रत्नाकरः समुद्रः कथमनहिमयः सपीभाववान् रत्नाकरस्य
सर्पमयत्वात्॥ तथागाधोऽतलस्पर्शः एतादृशस्त्वं रत्नाकरस्य वसमर्यादः मर्यादा विस्तारः तत्सहितः तथाऽ
द्रोको विउद्राणां जंतुविशेषाणां माकोग्रहैः तदत्रास्तीति न विस्मयः समुद्रस्य सदोद्रालयत्वात् यद्वा॥ उक्तत
राको प्युक्तनच्छिद्रमप्यस्य न कथं विस्मय आश्चर्यहेतुः प्रथमक्षे उद्रो कापीत्यत्र वृद्ध्यभावः शाकंध्वादिषु
पररूपमिति पररूपत्वेनेत्यवधेयं॥ तद्विघेरनित्यविकल्पो वितिकेचित्॥ सदा सर्वदा अहिः सर्पः मकरा

वास टी

२१

21

जलचरः॥तयोराश्रयः अमृतं जलं सुधा वा तन्मयः स पोतः स वहित्रः तस्याधः प्रदेशोऽचलो मैनाकादिगि
रिः नक्रः कुंभीरश्च महानदीनामीनः ईश्वरः अत एव सरित्पतिलेनाख्यातं अनतिमय इति पाठे समुद्रप
क्षेनतिशून्यः सर्वाधिकत्वात्॥अहिर्वृत्रे प्येहिः सर्पेप्यहिः क्रूरेपि च स्मृत इति विश्वः गाधालिप्सामनोर
थ इत्यनेकार्थः विभाषारिकाम्यामिति सूत्रे शोकोदीप्तिरिति जयादित्यः छिद्रं निर्व्यथनं शोकमित्यमरे
शोकशब्दस्य क्लीबत्वं प्रियकशोकचक्रेकचछदमिति शब्दार्णवेपि शोकशब्दस्य क्लीबत्वमत्र तु पुल्लिंगनि
र्देशो रुच्यतेऽभिव्यज्यते तेन शोकाभावे घञ्घञ्जवंताः पुंसीति पुंस्त्वएवं पामरे क्लीबत्निर्देशः प्रायिकः

राम

२१

उद्रेकइतिक्वचित्पाठः तत्रउद्रेकोऽभ्युद्रिक्तत्वंसर्वाधिकत्वंवेत्यर्थः सयात्रइतिपाठेपात्रंकलत्रद्वयांतरपा
त्रइतिप्रसिद्धं।सचंद्रआह्लादकः चदिआह्लादनेसचंद्रकर्पूरवान्वा।क्षरा।उत्सवस्तद्दानीक्षरादः आनं
दंकरोतीत्यानंदकरः पश्चात्कर्मधारयः यद्वादानंदाः क्षरोयद्दानेतेनानंदकरः।यद्वाक्षरादानदागरा।
काश्चतेषामानंदकरः।कुः पृथ्वीमुत्हर्षः अवनरक्षरांतेषांबंधुः यद्वापृथ्विहर्षरक्षरांबंधुः यद्वाकौ
मोदंतइतिकुमुदाः पंडिताः तेषांवनंसमूहस्तस्यबंधुः यद्वाकौमुद्यताइतिकुमुत्वंडितः क्विप्रत्ययेसा
धुः तस्यावनवबंधुः रक्षराकुशलः सकलकलाकुलगृहंचतुः षष्टिकलास्तासांगृहआश्रयः ततम

रातिबल्वंञ्शत्रुसैन्यंयस्मात्सतथा।पक्षेस चंद्रइंदुरेवक्षराादारात्रिस्तद्दर्षीकरः कुमुदवनंकैरववनंकल्ता कु
लंषोडञकलाःनत्मराभिरतिक्रांतवल्वंयस्यसतथा।यद्वातारामतिवयतिउत्कृष्टीकरोतिइनिकर्मण्यरा
तथाविधोनभवतितेजोभिरपिभावकत्वात्।यद्वातारानातिवत्ना यस्मात्सः अत्रातिबलशब्दस्यविशेषरा
त्वात्।पूर्वतियानोनभवतिनक्षिधोरनित्यत्वात्।सराजासुमेरुसमः मित्रबंधुरादित्यश्च।उदयोहद्विराविं
भीवश्च॥कांचनकामपिशोभांदधानः॥यद्वाचकारोवार्थे।कांवाशोभांनदधानः यद्वाकांचशोभांनविभ्र
त्।अपितुसर्वामेव।अलंकरणामंतरेरौवदेदीप्यमानत्वात्।यद्वाकांचनरवेवशोभांविभ्रत्।अतिगोर राम २२

वर्णत्वात्। पक्षे कांचनेन शोभां बिभ्रत्। सुवर्णमयत्वात्तस्य अचला स्थिराऽधिका च लक्ष्मीर्यस्य स्थिरा तिसं
पत्तियुक्त इत्यर्थः पक्षे अचलेभ्यः पर्वतेभ्योऽधिकलक्ष्मीः शोभा यस्य सः पुनर्विरोधाभासालंकारमाह। य
स्येति। सदा पार्थोपगतं प्रयोजनं महान्योभारः तस्य तरणे उत्पतनं तत्र न योग्यः क्षीणत्वात्। यद्वा पर्थ इव
पार्थः। अर्जुनोतिशूरत्वात् महान्योभार तोदेशः। तस्य तरणे संग्रामे न तयोग्यः। अथ यः पार्थः समहाभा
रतरणे योग्य एव भवतीति विरोधः। भीष्मो भयानकः नृपतइति न वस्तवः रुद्रो रविस्य पु। अशांतं नवं स्त
त्यमीहितं चेष्टितं यस्य न वं नूतनं वा। पक्षे शंतनुभीष्मपिता शंतनोरपत्यं शांतनवः। भीष्म एव शांतनवेहि

वास दी
२२
23

तइतिसप्तम्याअलुक्पश्चात्पसंबंधःभीष्मआत्मन्येनहितोभवतीतिविरोधः।यद्वाशांतनुर्भीष्मपिताततश्च
तुर्थ्यीअलुक्वैय्याकरणाख्यायामित्यलुकोऽग्रासावपियोगविभागादलुक्कुसानुचरोअनुचरसहितःन
गोत्रेकुलेनभूषितःतेनैवगोत्रस्यभूषणात्पक्षेयोगोत्रभुविपर्वतभूमौनोषितःनकृताधिवासःसकथं
सानौपर्वतैकदेशेचरति।सानोरपिपर्वतत्वादितिविरोधः।क्षत्रपथात्क्षत्रियमार्गात्नस्खलितः।प
क्षेनक्षत्रपथमाकाशस्तस्मात्त्रिशंकुनामाचांडालःपतितः।त्रिशंकुःकिलवसिष्ठशापाच्चांडालतांया
तःतज्जिगीषयाविश्वामित्रेणायाजितःतेनैवशरीरेणस्वर्गमगच्छत्ततोवसिष्ठापगृहीतेनमंत्रहुंका

राम
२२

रणादेव पथात् पतन्स्तपसा विश्वामित्रेणास्थापितइत्यादिकांडेकथा पुनर्विरोधमाहाशंकरोतीतिशंकरः कल्याणकारी महेश्वरश्चन विषादीन विषंराः विषभक्षणाश्शून्यश्च अतएव विरोधः हरस्यकालकूटभाक्त्वात् पावकोग्निः पवित्रकारी च। कृष्णवर्त्माग्निः पापमार्गइतश्च अग्निः कृष्णवर्त्मेनेतिविरोधः। अर्थभेदाद विरोधः एवमन्यत्रापि। वह्निः शुष्याकृष्णवर्त्मा चिरित्यमरः। अश्रयाः सेव्याः आशादिस्तेयस्यसः सर्वदिक्पतिरित्यर्थः। यद्वा आश्रयं येतेइत्याश्रयाः दीनास्तेषामाशायत्र। एतादृशो वितदहनो न तापयिता अथ चाश्रयाशो वह्निर्देहनोतमवतीतिविरोधः। आश्रयाशोवृहाह्वानुरित्यमरः। अंतकोयमजीवतंजीवितंजीव्यं चामित्रेसुहृत्सु

वास दी
२४
25

र्विश्व। मंडलं देशो विश्वं चारु चिरिच्छादी विश्व। नलो नाम राजा स कलिना कलियुगेन विघटितो राज्यभ्रंशितः॥ ए
षा रंरायपर्वशि। नलोपाख्याने कथा पक्षे कलियुद्धं तत्र न विघटितो न पलायितः। चक्री कृष्णस्तेन सृगालो नाम सु
रो मारितः तद्वधेनायं ख्यातः। पक्षे सृगाल इव सृगालोऽसात्विकपुरुषः सृगालशब्दस्तालव्यादिर्दत्यादिश्च ताल
व्या अविदत्याः स्युः शंबशंबरश्मश्रूरेंकराः। रसना विचजिह्वा यां सृगालः कलशे विचेत्यभिधानात्॥ यशोदानंदगोप
वधूः पक्षे यशसा दययावान्वितः। यद्वा दानंदायशसा सहितादा यशोदा तया यशोयुक्तदयादानेनान्वित इत्यर्थः
जरासंधो नाम राजा घटितसंधिर्विग्रहः शरीरं यस्य सः पक्षे संधिः संधान विग्रहो युद्धं घटितौ कृतौ संधिविग्रहौ राम
२४

येनसजरासंधोद्विखंडोजातोजरानाम्न्यायोगिन्यासंधितइतिहरिवंशे।।भार्गवःभृगुः।सहदानभोगाभ्यांव
र्ततेसदानभोगःपक्षेसदासर्वदानभोगःआकाशगामी।।सुमित्रंशोभनंसुहृत्सुमंत्रःशोभनोमंत्रोशो
भनमंत्रःपुरुषोवा।पक्षेसुदक्षिणादिलीपवधूः।गौःपृथ्वीसुरभिश्च।रक्षिता।गौर्येनसः।कुशलंभनोज्ञं
वयोयौवनंरूपंसौंदर्यंचजनित्रयोरुच्छ्रायोऽतिशयोयेनसः।यद्वाकुशलवसोरूपोच्छ्रायःपक्षेजनि
तशब्देनबहुव्रीहिःपक्षेजनितयोःपुत्रयोःकुशलवयोःरूपोच्छ्रायःसौंदर्यातिशयोयस्मात्सः।।यद्वा
नितःकुशलवयोरूपस्योच्छ्रायोयेनसःतस्यतनयःकंदर्पकेतुर्नामेतिसंबंधः।कीदृशः।आश्रितानां

वास टी
२५
25

दयतीत्याश्रितनंदतः यद्वानंदनानटादयः॥आ॥श्रितानंदनायत्रपक्षे आश्रितंनंदनंदेववनंयेनसः॥

शिवंकल्याणं।शिवागौरीभोगिभोगाःसर्पशरीराणि।तैरंकितः।पक्षेभोगिनोज्ञानःतेषांभोगैरूत्तमांगैरंकि रा

तः।यद्वातेषांभोगस्यकायस्यांकश्चत्रादिसत्तद्युक्तःतारकादित्वादितच्।महेश्वरेन्द्रैर्मुक्ताकोटिःकोटि

सं[illegible]कंधनंयस्यसः।पक्षेहराधिष्ठिताग्रःमधुर्वसंतः।नानारामाणांविविधस्त्रीणांमानंदकरः।पक्षेना

नाआरामाउद्यानानितेषामानंददयिता।भुवनंजगत्पानीयंचमुखरितंवाचालितंभुवनंयेनजह्योषरा

येतिशेषः पक्षेमंदरगिरिचालनेनपानीयशब्दःरागरज्जुकामः।तथाचोत्पलिनी।कंदर्पोदर्पकःकामः

राम
२५

शिखिमृत्युर्जयावहा। सर्वधर्ममनोहारी रागरज्जुः प्रकीर्तितइति। रतिरनुरागः। कामस्त्री च। ईशानो हरः। भूति
र्भस्म सम्यक् ध्यायति चिंतयतीति संध्यः आतश्चोपसर्गो इति कः। अतः परमार्थग्राहित्वात् दुश्छलितः छलि
तुं न केनापि शक्यत इतित्यर्थः॥ यद्वा संध्यायत्यनयेति संधिः बुद्धिः ध्यायतेः संप्रसारणं चेति क्विप्। संध्या बु
ध्या उश्छलितः से पन्नः। यद्वा संध्यया प्रतिज्ञया मर्यादया वा उच्छलितो विदितः संध्या प्रतिज्ञा मर्यादेत्यम
रः। केचित्तु संधा संधानेनोच्छलितइति योजयंति तत्र संधिशब्दस्य पुल्लिंगत्वात् संध्युच्छलितइति सा तु॥
संधिर्ना विग्रहोपानमित्यमरात्। पुल्लिंगत्वनिर्णयः स्त्रीलिंगत्वे तु प्रमाणाभावएव॥ पक्षे संध्याकालविशे

वास टी
२६
20

षःअवदातःशुक्लोविष्णु[illegible]श्चहृदयंस्वरूपंवक्षश्चविष्णुपदमाकाशंहरिपादश्चासहमयालक्ष्म्यावर्त्ती
तइतिसमः।रसःशृंगारादिःआहसईषद्धासःताभ्यामुचितःसंबद्धःउचसमवायइतिधातुःपश्चात्सम
शब्देनकर्मधारयः।यद्वासमस्तत्वात्योऽनुरागोजनेषुयस्यससमरसःआहसेनोचितःपश्चात्कर्मधारयः
पक्षेसमरसाहसंयुद्धसाहसिकतापार्थोऽर्जुनःकुवलयस्यभूचक्रस्यापीडेनावगाहेनेनभूषितः।यद्वाकु
वलयांभूमंडलमेवापीडंस्रकुइतिरूपकंतेनभूषितः।यद्वाकुवलयेभूमेःप्रांतदेशःतस्यापीडेनाक्रमणे व
नभूषितःवलयःप्रांतदेशःस्याद्वलयंकटकेपिचेतिविश्वः।यद्वाकुवलयापीडेननीलोत्पलदाम्नाभूषि राम
२६

नः पक्षे कुवलयापीडेनामकंसह स्तीतार्क्ष्यो गरुडः गरुत्मान् गरुडस्तार्क्ष्य इत्यमरः। सुँखाः पंडिताः तेषां हर्षक
त्री पक्षे समुखो गरुडपुत्रः सुनंदनः पुत्रो यस्य सः। सुमुखो नंदनश्वास्य उरूपीदयितमनेस्का त्वलिनी विनतानंद
न इति पाठे विनतानां नम्राणां नंदकः। पक्षे विनता गरुडमाता। तस्या नंदनः पुत्र इत्यर्थः क्रोडीकृता अंकाग्रो
पिता सुतनुनारी येन। यद्वा क्रीडीकृता आश्रिता शोभना तनुः शरीरं येन पक्षे क्रोडीकृतः शूकरत्वमापादिता
शोभना तनुः शरीरं येन क्रोडः शनौ शूकरे चेति मेदिनीकारः। शांतनवो भीष्मः स्ववशे स्वापन्नौतायां स्था पि
तो कालधर्मी येन सः। कालेवर्षादिनिपायनत एवतथा च व्यासः। कालो वा कारणं राज्ञो राजा वा कालकार

वास टी
२७
87

राां।अत्रतेसंशयोमाभूत्राजाकालस्यकारणामितिधर्मशास्त्रायत्तएवराजाधर्मस्यकारणामितिस्मृतेः
पक्षेकालधर्मोमरणांस्वेच्छामृत्युत्वात्भीष्मस्यसुशर्मणातिसुखेनपक्षेसुशर्मनामकेनकौरवयोधेनसु
बाहुःशोभनभुजःरामानंदीस्त्रीसंतोषकारीपक्षेसुबाहुर्नामाराक्षसःसचराघवानंदीतिविरोधः॥तच्छत्रु
त्वात्तस्यसमदृष्टिः॥सर्वत्रतुल्यदर्शनःमहेश्वरोमहानीश्वरः।अथचसमदृष्टिर्महेश्वरइतिविरोधः॥
भगवतस्त्रिनयनत्वात्।आमयोरोगमुक्तस्त्यक्तआमयोरोगोयेनसः।अतरलमध्योचंचलहृदयः॥प राम
क्षेमुक्तामयोहारःसतरलोहारमध्यगमणिस्तन्मध्योभवतीनेतिविरोधः॥विमलोयस्तरवारिःख २७

लस्य धारयात्रासिताराजहंसान्तपक्षेश्छायेनसः। पक्षे विमलतरया वारिधारयात्रासिताराजहंसाः पक्षिवि
शेषाः येनसः मेघवारित्रस्ताः किलराजहंसाः मानसंसरोयांतीतिवार्ता। राजहंसास्तुरक्तचंचुचरणौ लौहि
तैः सिताइत्यमरः। वंशप्रदीपः कुलप्रकाशकः अक्षतादशाश्रयोयस्यसः। अथच प्रदीपोऽक्षतदशा
वर्त्तिरितिविरोधः। वंशप्रदीपोवंशावलंबी आकाशदीपः वर्त्तिर्दशा। दशावर्त्तिशावयइतिहारावली॥ व
र्त्तिकाचदशामावेदिस्फुरत्यलिनीचयेनसंतः परांहृदि मवापुरितिसंबंधः। कलाकामकला चंद्रकला
चशर्वर्याः रात्रेरीतेरुपप्लवस्य हरराशीलेनतदुदयेहि तस्याअंधकाराद्युपप्लवः पलायते। पक्षेश

र्वस्यहरस्यरीतिःस्वभावःछायावाप्रभावोवातद्धरराशीलेन।दलितोविदारितःकैरवःशत्रुर्येनकैरवी
चंद्रिकाप्रोक्ताकैरवंकुमुदेद्विषीतिविश्वः।यद्वाकंसुखंयंतीतिकायः।इरागतोअन्येभ्योपिदृश्यतइति
क्विप्।गुरोर्वाहिरेचीतिवृद्धिःकैःसुखोदलितःप्रकाशितःकायांसुखिनांरवोध्वनिर्येननेतायद्वाद
लितोकैरवोदुर्जनोयेननेनअतमिह्नकैरवहसितमित्यत्रकैरवशब्दस्यदुर्जनेवाचकता।पक्षेदलितं
विकासितंकैरवंकुमुदंयेनतेन॥कुमुदेतिव्याख्यातमेव।सकलेतिकुमुदेतिचविशेषणस्यपूर्वदत्त
मपिनयोनरुक्तमत्रावहति।विशेष्यंमंदात्क्वचित्सुस्तकविशेषणाद्वयमिहनास्त्येवाप्रसाधिताप्र

कर्षेण। साधिता आशा दिशः प्रत्याशा वा येन। पक्षे प्रसाधिता अलंकृता आशा दिक् येन गोत्रं वंशो नाम वा। पर्वतश्च
गोत्रा पृथ्वी वा। जीवनं जीव्यं पानीयं च जीवनं भुवनं वनमित्यमरः। सत्त्वमाशयः प्राणी च यद्वा। सत्वसञ्ज्ञान प्रत्य
यविषयत्वं तदेव प्रसन्नं येषां ते तथा। यस्य मकरकेतोः कामस्येव दर्शनेन वनिता जनस्य हृदयमुल्ल त्लासे
ति संबंधः। जनिता अनिरुद्धा अप्रतिबद्धा लीला विलासो येन तस्य रतिप्रियस्याऽनुरागवल्लभस्य कुसुममे
मेव शारस्त्वदसनस्य क्षेपकस्य क्रीडार्थं पुष्पधनुर्द्धरत्वात्तस्य। यद्वा कुसुमशारं काममस्यत्सा क्षिपति रूपव व
न्तया कुसुमशरासनस्तस्य। पक्षे कामसुतो निरुद्धः। रतिः कामवधूः कुसुमस्य शरासनं धनुर्यस्येति गमकत्वा

वास टी

२९

२९

हैप्यधिकरगाये चिबहुव्रीहिः। यस्मैव संतायेवव तत्तताइव तरूगायस्मृह यांव भूवुरित्यन्वयः अनुगतो भक्ताः
दाशृक्षिगाः सरखलः सत्तुधार्मिकः एषामागतिस्थानं। पक्षेसंगतदक्षिणानिलाय कोमलोऽतिसुंदरः कोकिलस्यकरू
यंगानं पस्य कोमलश्चासौ कोकिलरुतश्चेति कर्मधारयः नेत्रश्रुत्योः चक्षुः कर्णयोः सुखदश्च कोमलकोकि
लरुतश्चेति च कर्मधारयः। कोमलत्वान्नेत्रसुखदः कोकिलरुतत्वाछ्रुतिसुखदश्च पक्षे कोकिलरुतश्चेति
च कर्मधारयः। कोमलत्वान्नेत्रसुखदः कोकिलरुतत्वाछ्रुतिसुखदश्च पक्षे कोकिलश्चतद्रुतं च कोकिलरुते
नेत्रश्रुतिसुखदे कोमलकोकिलरुते यत्रसः। यद्वा नेत्रश्रुतीनां समीरणः सुखदः शिशिरागमनदक्षिणा राम

२९

निाल्संगमेनवाकोमलंमनोज्ञंकोकिलरतंयत्रपश्चादनयोः कर्मधारयःचक्षुश्रवाः काकोदरःफणीत्यमरः॥ प
ल्लवःशृंगशृंगारयोरपीतिविश्वः। कांतारतरंगःस्त्रीसरतानुरागःयद्वारंगोरंजनंरागंतातुघञ्।यथापूजमतेः
पूगःकृतकांतायाःरतेरंगोरञ्जनंयतनस्मै।पक्षेकृतःकांतारस्यवनस्यतरंगश्चालनमारवठकादिनायेनसः।
सुरभयोमनोज्ञाःख्यातावायेसुमनसःपंडिताःते ष्वभिरामानरागोयस्यतैरभिरम्यतइतिवाघञ्।पक्षेसुगं
धिपुष्पमनोज्ञायसुरभिःशौरभेख्यातोवसंतेपंडितपिचेतिविश्वः।पद्मालक्ष्मीःसाचसर्वजनैस्तस्यमु
ख्यतेसर्वजनीनत्वात्तस्यपक्षेपद्मंकमलंकनकंहिररायं।धत्तूरकंचपकंवा।कनकंचंपकेहेम्निधत्तूरेनिगद्य

तइतिविश्वः।दमयतीतिदमनकः पुष्पविशेषः तच्चैव संतनातिक्रम्यतेशिशिरभवत्वात्तस्य उत्कलिका उत्कंठा
उत्कंतकोरकाश्चा।भ्रमरः कामुको भृंगश्चा।यद्वा भ्रमरोऽलकविशेषः।यद्वा भ्रमरो विभ्रमो विलासस्तस्य रसं
गताः यद्वा भ्रमो मोहस्तेन योर ससंगताः पारस्त्री विमुखत्वात्तस्य॥भ्रमरः कामुके भृंगे गलल्लाठालकयोर
वीतिविश्वः।प्रवालो मनोहरकेशस्तेन हारितायामनोज्ञा।यद्वा प्रवालो मणिभेदः हारो मुक्तामालातद्युक्तैः॥
पक्षेनवपल्लवहरराशीलाः।सुपत्रजातैरितिस्तिष्ठिल्येइतिनिशिः।वयो यौवनं पक्षी च।वयो बाल्यादि पक्षी
वयो वनं चक्र चिह्नय इति शाश्वतः।यस्येस्य हृपां मुवुरित्यत्रस्य हैरीप्सित इति संप्रदानसंज्ञा।कोदंडध

नुःशरासनकोदंडकार्मुकमित्यमरः॥ आसादितमित्यत्र। लिंगव्यत्ययो बहुवचनव्यत्ययश्च कृतयुगं सत्ययु-
गं अनेन स्मरशोन धैर्यस्थैर्यमासादितं। अमुनाधैर्यशाश्चर्यमासादितं॥ स्मरशास्याशुविनाशित्वात्॥ मु-
क्ताहाराशांस्तनसमीपत्यागेनतासां विधवात्वं सूचितं यस्य समरसावरे खङ्गोररा जेति संबंधः। दंतुरि-
तं व्याप्तं। पत्रं वाहनं रथः स्यंदनः यद्वा यत्र रथो बाराः पक्षे पक्षी व त्र रथो बारा। पक्षिशोारित्रिधरशाः
रक्तमेवावारिजलेन त्र संचरन् अटन् वेत्र रचितफलकविशेषः स एव कक्षपाय त्र उत्फुल्लं विततं पुंडरी-
कं श्वेव[illegible]त्रं यत्र तादृशं यद्वा। वाहिनीशतसेनाशतेनेतसमाकुले व्याप्ते। पक्षे पुंडरीकं श्वेतप[illegible]द्मं वा

वास टी
३१

ह्लिनीनदीक्वचिदन्यथापाठः॥तत्ररक्तवारिजंलोहितपद्मंसंचरदनेकच्छायोत्पलंनीलोत्पलादिकंपुंड
रीकंश्वेतपद्मंयत्रनदीशतेनसमाकुलेवक्षेरक्तमेववारिततोजातंरक्तवारिजंसंचरत्गच्छत्अनेकाच्छाय
मनेकाकारंउक्तंतपलेमांसशून्यशरीरंपुंडरीकंश्वेतच्छत्रंयत्रसेनाशतेनसमाकुले।पुंडरीकंसितच्छत्रेसि
तांभोजेपिकीर्त्तितमितिविश्वः॥तरंगिरायांचसा।नायांवाहिनीपरिकीर्त्तितेतिच।कबंधोलूनमस्तकः
कायः।पानीयंचकबंधछिन्नमस्तकेपिकबंधमुदकंमतइतिविश्वः॥भटोवीरपुरुषःचारटोमरूयंच
रकोनामपक्षीच।नीर्थादोमरराणाद्यतोभटइतिवा॥सुरसुंदरीदेवस्त्रीगगांमस्यश्व॥अथानंतरं॥॥ राम ३१

एवंचंद्रादिषुसत्सुकदाचिदविकस्मिन्नपिकालेसकंदर्पकेतुः॥कन्यकांस्वप्नेऽपश्यदित्यन्वयः।अवसन्नायांप्रा
तःकालीनायांएतेनप्रातःकालस्वप्नस्यशीघ्रफलदायितापनिता।तदुक्तंस्वप्नाध्याये।अरुणोदयवेलायां
सप्ताहेनफलंभवेदिति।यामवतीरात्रिः।दधिवत्धवलश्वेतेकालःप्रभातादिःसचक्षपराकइवतस्यभक्षणाविं
डःक्षपराकायपिंडंकृत्वाभोक्तुंदीयते।सोपिदग्धाधवलएवंभवतीत्यादिविशेषणाविशिष्टेचंद्रेपश्चिमस
मुद्रेमज्जतिसतीत्यन्वयः।मेनकाविद्याधरीभेदः।शकलःखंडः।भिन्नेशकलखंडेवायुंसीत्यमरः।मधुच्छत्रस्य
छायामधुच्छत्रछायंविभाषासेनेत्यादिनाक्लीबत्वंतस्यमंडलमिवोदरंयस्यतस्मिन्कालंकान्वितत्वाच्चंद्र

मध्यस्य॥ए तेन निःप्रभत्वमुक्तं। मुखनिलीनसिरसो विभावरीवध्वा इति संबंधः। उपधाने गेडुकं राजतं रजतघटितं
विभावरी रात्रिः। शेषं मधु पीतशेषं मद्यं। चषकं पानपात्रं स्यादिति हारावली कामुकस्तुल्यः यद्वा। याशं रत्नकांति
स्त्रां प्रीतिकामुके अभिलाषुके अत एव जल्पघोत्फुल्ल नकुमुदिनीनायकश्चंद्रः कर्दमितं संजातकर्दमं प
रागः पुष्परेणुः रेणुमात्रं वा। षट् चरणो भ्रमरः। कलप्रलापोऽव्यक्तमधुरध्वनिस्तेन निबोधिता ज्ञापि
ता। अत एव चकिता चंचला अभिसारिकायाभिः। तासु कांतार्थिनी तु या याति संकेतं सा भिसारिके त्य
मरः। शारिका शब्दस्तालव्यादिर्द्वित्यादिश्चात दुक्तमुष्म भेदे स्त्री लिंगयं सारिः शकुनी विशेषे तु दंत्यताल

ध्यंति। कर्मठः कर्मशीलः। कर्मणि घटत इत्यर्थे कर्मणि घटोऽठजित्यठच् प्रत्ययः। मठ छत्रादिनित्यमरः। भासो
विभ्रासः मुखरोऽत्र गायनः। कार्पटिकः कापडिरिति प्रसिद्धः। रथ्या वर्त्म रथ्या प्रतोली विशिखेत्यमरः। प्रदीपेष्वेवं
सत्स्विति संबंधः। अनितवीटास्तया अल्पत्वेन। निधुवनलीला सुरतक्रीडा निधुवनमायोजनमाहुरर्थविद इति
हारावली। उड्डीविका उभीइति प्रसिद्धा। बंधो मायूरादिः। शरराङ्गृह रक्षित्रोरित्यमरः। अव सुरक्षी मारो षुसे
होऽनुरागः॥ तैलं च। दशा वर्त्तिर्वर्त्तयश्च अंतं शेषं। पात्रं भाजनममात्यश्च। निशांतगृहे। निशांतपस्त्य सदनमि
त्यमरः पक्षे निशा रात्रिस्तस्या अंतमध्ययोश्चररा शीलते बु। पतंगः आदित्यः शभश्च। पतंगो शभादित्या वि

तिविश्वः। मकरंदः पुष्परसः। निकरंबः समूहः। वासागारोवसतिनिमित्तं गृहं। तादृशीषु कामिनीषु सतीषु अ
लकैर्लक्षितासु उपलक्षरोत्पनीया। अश्रराः पूर्वावस्थाबाष्पः। तुलाकोटिनूपुरः। चरराापक्षवैर्लक्षितासु
रजनिशेषः प्रातःकालः इषदर्थेदरोऽव्ययंइत्यमरः। दलितं विकासितं। मुग्धौव वीरसुंदरानिविश्वः। उद्दे
क्षतु संचरतु। नखपदेन नखक्षतेनदष्टोगृहीतोयः केशस्तस्यतिर्मोकोमोक्षः। भोगावासोवासगृहमि
तिहारावली। क्षरााद्रागतेरात्रिवृत्तं। वेष्यास्वंधष्टतामतेतिहारावली। संस्मररां संस्मारः तत्करोतितदा
चष्टइतिणिचु। अन्यथाहृस्वत्वं सातु। चाटुव्याहृतिर्मनोमनोज्ञभाषितं मंदाक्षंह्रीस्त्रपाव्रीडेत्यमरः। खना

काशेननालंकृतः।सुंदरतांनीतः पक्षेअन्योन्यमूषरामूष्यभावेनपयोधरस्यनखेनालंकृतिसंभावना॥
नखेनकररुहेणालंकृतस्तनेष्वित्यर्थः जीवितेशोयमः।तस्यनगराभिमुखीषु।पक्षेजीवितेशोवल्लभ
स्तस्यपुरंशरीरंतदभिमुखीषु।वल्लभेधर्मराजेचजीवितेशोधनागमइतिविश्वः।पुरंपुरिशरीरेचगुग्गु
लौकथितःपुरइतिच।उत्कलिका उत्कंठा उत्कृतकोरकश्च।मारुतेवहतिसतिइतिसंबंधः।केशरःकिं
जल्कः तालव्यमध्योयंवृक्षार्थः।सदार्थश्चकेसरशब्दोदंत्यमध्यः॥यथाभट्टिकाव्येप्राकृतसमके
केसराहतनालवकुलबद्धच्छायं।आविंगलल्लोलकेसरंरामबलमितिच।केसरोबकुलेसिंह

सटायांपुष्पमध्यगइतिविशेषः।तालव्यमध्यत्वेइदमेवयमकितंप्रमाणांरमणीनांकेशरेणामुषि
केशस्थकुसुमधूलिचौरे।एतेनाल्पत्वंगंधवत्त्वंचध्वनितं।कीदृशीनांरणितामधुराशब्दितामनोज्ञाः
मरायोयासांताः।बाहुततादृणानंविकचकुमुदाकरेइतिवातवहनाधारकथनं।कीदृशेमुदा
करेसंतोषकारिणि।कीदृशेसंगभाजि।अर्थात्रमणीनां।क्वचिन्मधुकररमणीनामितिपाठः।त
त्रतुनीलत्वात्मधुकरामरणायइव।नीलमणितुल्यास्तेषांसंगभाजीत्यन्वयः।रहितासुत्यक्तासु
अर्थात्प्रियसंभोगलक्षणेनसुखेन।मुर्मुरः।तुषाग्निः।दर्पकःकामःतस्येवसुदहनस्यशराग्नेःअ

र्धकेसमर्पके अर्थात् विरहिता स्वेत। प्रियतमा त्र वल्लभवतीना पिकात स्यात्तं तन्मेता दिभाषितं। कोक प्रियत मे
ति पाठे कोकः चक्रवाकः मेखलादाम्नावरिहतजघनस्थलामित्यन्वयः। तद्विशेषणान्याह। जघनेतिरोमावल्येव
लतातस्या आलवालेनथालाइतिप्रसिद्धेन लतायां जलाधानार्थमालवालः क्रियते चंद्रमंडलं चंद्रशरीरं परिवेशो
वेष्टनं। प्रशस्तिः प्रशस्तिवर्णाः सो वरोमावली हृदयात्येवबंदिता बंदीजनास्तेषां निवासगृहं कारागृहं सर्वमतांस्यत्रैव
संतिइत्यर्थः। विहंगमः पक्षी तासकः शलाका काबिरि तिप्रसिद्धा मध्यभागेनालंकृतामित्यन्वयः। चंद्रदर्शनाप्राप्त
रवेदोयत्रेत्यन्वयः। मूर्द्धजयोरुपरिजातयोः। चिंतयेत्यादि विशेषणाद्वयंस्रीणात्वेहेतुः। कलत्रं श्री राभार्याचागु

वास टी
३५
35

रमीहानुपाध्यायश्च अनुशयो दीर्घद्वेषोऽनुतापश्च भवेदनुशयो द्वेषपश्चात्तापानितापयोरिति विश्वः। पयो
धराभ्यां मुद्रासमानामित्यन्वयः। पूगयाश्रं फरूबकंकवंधेरंड मुंन इति हारावली॥ चुबुकं स्तनाग्रं। चुबुकं तु
स्तनाग्रं स्यादित्यमरः। मुद्राचिह्नं सतोयाभ्यां सहिताभ्यां परिराह्न अभोगः। खिल्लितं कीलितं गिरिसारो लोहं
गिरिसारमयस्तीक्ष्णां कान्ताय सं चशस्त्रकमिति हारावली। कुछयः कामः कपोलं च तुरिकागमं चुल्लीति प्रसिद्धा।
समुद्रः संपुटो ज्ञेय इति हारावली। बंटा इति ख्यातः। हाररत्नताम्ररागलं लोभनीयं लोभविषयो ययोरेतादृशचक्र
वाकाभ्यामिवायद्वा कर्त्तर्यपि साधुरनीपर प्रत्ययो मध्यगेयादि पाठात्। हाररत्नताम्ररागलोभनीयत्वेतस्तनयोरु

राम
३५

भतत्वं सूचितं। हारलतारोमावलीसंगमेनशुक्लनीलसमावेशं सूचितः। अत एव सितासितसरित्संभेदरूपस्तीर्थविशे
षः। प्रयागइहरूपितः। अधरपल्लवेनेशोभमाना मित्यन्वयः। द्विजाः दंताः दंतविप्राण्डजा द्विजाइत्यमरः। अनुरागः कविसं
प्रदाये लोहितो वर्ण्यते नयनयुगलेन विभूषिता मित्यन्वयः दत्तं पत्रं द्राघीयसा अतिदीर्घेण आकर्णीनेत्रामित्यर्थः पक्ष्म
लः श्रेष्ठपक्ष्मयुक्तः चटुलश्चंचलः। अलसो मंदः। गवाक्षजालमार्गः। रागो लौहित्यं विषयासक्तिश्च। आविर्वीरां निर्वृतिमोक्ष
श्च। गतिप्रसरो गमनप्रचारः उपांतं समीपं। चक्षुषोरेकदेशगुरात्तु जगदित्यादिना दर्शयति। नाशावंशेन परिष्कृतामित्य
न्वयः। वाररोहा स्त्री। चरंडोत्नीली विंडिका आगंडिरिति यत्र सिद्धिः। भ्रूलताभ्यां विराजमाना मित्यन्वयः वेदिका प्रवाहः।

वास टी
३६
36

यथात्रिवेणी। त्नासिकाननेकी। घनसमयः वर्षाकालः। पयोधरोमेघः। कुचश्च। परीक्षायांजयशब्दस्यघोषणामुदीरयतां॥
तुलकोटिनूपुरं। तुलाया अग्रमागश्च प्रतिष्ठितास्थिता प्रतिष्ठांनीताच। तारकादित्वादितच। परीक्षासमयेहितुलास्थि
तोजयजयेतिसर्वैरुद्गीयते। शुद्धीभवतु। कर्णाःकुंतीपुत्रःभ्रवणांच। वलिस्त्रिवलीवकयोरभेदेनबलिचरूवेन्नीआ
सुरभेदश्चतुलातुलनापक्षेकन्यातुलेराशीउखाबाणासुता। अनिरुद्धमनिवारितंदर्शनसुखंयस्या। पक्षेअनिरुद्धका
मसुतस्यदर्शनेनसुखंयस्याः। नंदनासंतोषकारिणीईक्षणारुचिर्यस्याः पक्षेनंदनस्यइंद्रवनस्यईक्षणेनदर्शनेनरु
चिरनुरागोयस्याः। यद्वानंदनइतिसप्तमीनंदनेक्षणारुचिःक्षणोक्षणोअनुरागःतांडवंनृत्यंचक्षुश्रवासर्पःपक्षेच

राम
३६

क्षुर्नेत्रं श्रवः कर्णः। अटवीचतं। उत्तुंगउपचितश्यामलः कृष्णः। कुचस्तनो यस्याः पक्षे उत्तुंगं श्यामं हरितं लकुचं फ
लविशेषो यत्र। लकुचो लिकुचो डहुरित्यमरः। वडहर इति प्रसिद्धं फलं। श्यामो च हरिता सिताविति विश्वः। यद्वा उ
त्तुंगो महान् श्यामो वृक्षविशेषो लताविशेषो वा लकुचश्च यत्र। श्यामशब्दः पुल्लिंगोपि लतावाचकः। तथा च धर
णिः लता या श्यामलेश्यामइति। सुग्रीवा सा शोभनग्रीवा। अंगदः केयूरः पक्षे सुग्रीवो वानरराजः। अंगदस्तद्भ्रा
त्रजः। शनैश्चरेरा मंदगामिना शनिना च। सौम्येन शोभनेन बुधेन गुरुणाः महता वृहस्पतिना च। लोहितेन र
क्तेन मंगलेन च। विकचेन विशिष्टकचेन। विशिष्टपक्ष्मणा। विकसितेन वा पक्षे विकचेन केतुना शुक्रेण वा। भा

वास टी
२७
37

स्वतादीप्यमानेनरविणा च। अलंकारेणागदादिना। बुधः सौम्य इत्यमरः। कुजो भौमो लोहिताङ्गो महीसुत इति च।।
सप्तार्चिः शनिराख्यातो विकचाः केतुरुच्यत इत्युत्तमरत्नत्रं। उत सूर्वी विकचः केतुरित्यत्यलिनी च। श्रुक्रे केतौ च विक
च उत्पलुक्लेपि निगद्यत इति विश्वः। कचः केशः शिरोरुह इत्यमरः। इदमेव प्रमाणं कचादिशब्दानां पक्ष्मवाच
कतायामित्यवधेयं। संसारोनेयया मिति श्रित्र लेखया नयासंसारः शोभत इत्यर्थः। क्वचित् कुंगोरेति पाठः। स
सुगम एव। रसायनं जराव्याधिजिदौषधं संकल्पो मनोव्यापारः निधीयते अस्मिन्निति निधानं आश्रयः विजया
र्थं पताका विजयपताका अभूभूतिरभिभवकारणं। बहुलवचनात्। करणोक्तिनामदनो नयाभिभवनीत्यर्थः सं

राम
२७

मतमिंद्रियाणामन्यविषयाग्राहकत्वात् विहारः क्रीडा आयतनं गृहं विस्रोभनलुब्धता प्रजापतेर्ब्रह्मणः कन्यका
मित्यनंतरं वासवदत्तामिति पाठे न भाव्यं। स्वसए वज्ञातं तथा मा यि अन्यथाऽज्ञाततथा मनः तस्य तस्यामनुरक्तस्य त
त्संगमाय चलितस्यांतरकाले वासवदत्तासमीपगमनं वक्ष्यमाणमयुक्तं स्यादिति। कियता विमासेना ष्टादशवर्षी
ति पूर्यंत इत्यष्टदशवर्षदेशीयामित्युक्तं। ईषदसमाप्तौ कल्पदेश्यदेशीयइति देशीयत् प्रत्ययः। एवंविधायविवा
हितत्वात् कन्येत्युच्यते। अतएव कानीनः कन्यकाजात इति स्मृतौ व्यवस्थापितं संगच्छते मुमुचे त्यक्तः स इति शेषः। वि
बुद्धो जागरितः। उत्कीर्णमिव सर्वीत। भावेन दृष्टमित्यर्थः। निरवातास्थिता आजुहाव आहूतवान्। कपाटमररं तु

वास टी

३८

३८६

त्व्येइत्यमरः। तथैवनिमिलितनयत्वादिना अनेषीतूनीतवान्। प्रियश्चासौसोसखा चेति विग्रहे राजाहःसखिभ्यष्टि
तिटच् समासांतः। असाप्रतमयुक्तं। वितर्कः संशयः सएवदोला उभयकोटिस्पर्शादुभयोरूपकं। अनुचितमयो
ग्यं अनिष्टोद्भावने अनभिमतप्रकाशनत्योरसोनुरागः। तदुन्नतंतत्प्रधानं। भीमोभयानकः नवकानां यूनां द्वेषी
यद्वा। नवकास्तत्याः। अनुकंपायां कन्। तेषां। पक्षेभीमः।। पांडवविशेषः। सबकानामासुरस्यद्वेषीनभवतीतिवि
रोधः। आश्रयमश्नातीत्याश्रयाशः। आश्रीयतइत्याश्रयः। तथा च प्रभुभक्षकइत्यर्थः। मौरिजनत्वांश्ववकुक्कुर
इव अनुचिताचरणादस्थिरप्रकृतिर्द्वा। अथचाश्रयाशोऽग्निः समानरिश्वावानइतिविरोधः। श्वनिकटुदीहक

राम

३८

त्वात् महान् रसो मात्सर्यं यस्य महान् अरसो रसमून्य इति वा। अथ च अतिकटुर्महारसो महास्वाद इति विरोधः। यद्वा अतिकटुर्महारसो जंबीरफलमिति विरोधः। लालितः प्रशातः चालितश्च काठवमिति पाठेऽसभ्यस्मारकत्वात्॥ ग्राम्यः काटवकेकाटिकादेवीमनेन ग्राम्येरदाहृतत्वात्। तस्मात् कटुत्वमिति पाठो युक्तः। विजहाति त्यजति। मधुरः सुखदायी परीणामे वैरस्यकारीति विरोधः॥ यद्वा अतिकटुर्महारसो जंबीरफलमिति विरोधः लालितः प्रशातः चालितश्च काटवमिति पाठोऽसभ्यस्मारकत्वात्। ग्राम्यः काटवकेकाटिकादेवीमनेन ग्राम्येरदाहृतत्वात्। तस्मात् कटुत्वमिति। पाठो युक्तः। विजहाति त्यजति मधुरः सुखदायी परीणामे वैरस्यकारीति केः मंदवचनः। पादपरागश्चर

वास टी
३९
39

राधूलिः। अवधूतस्ताडितः। क्षिप्तश्च। मूर्द्धानं कषाययति। शिरःशूलमुत्पादयति पक्षे कषाययति धूसरयति। प्रस
वः फलमनुभूयते आद्रियते संभाव्यते च। मोहो मूर्छा असदभिनिवेशश्च। दृढयति स्थिरीकरोति। खलपक्षे वा श
ब्दः समुच्यते येन वा प्रदयोगात् स्यात् विरहः शत्रुत्यागः सर्वद्वेषात् पक्षे न वारि विरहः न जलविश्लेषः। ती च देशो निम्न
स्थानं। तस्य वारितापायः वृरि नत्वा न्। मत्सरो द्वेषः। मात्सर्यमपि मत्सर इत्यमरः। केचित् क्रोधेपि मत्सर इति रत्न
कोषः। बहुर्मत्सरो यस्येति विग्रहः। पक्षे बह्वी मत्सरा मक्षिका यत्र मक्षिका मत्सरा ज्ञेया भं भराली च सा मतेति उत्
रतंत्रे। मत्सरः कृपणे काये मक्षिकासु च मत्सर इति धरणिकोशः। नूमक्षिकावाचकः पुल्लिंग एव मत्सरशब्दः। सुम राम
३९

नसः पंडिताः। वृष्याशि चा दोषाराचिः गुणाप्रतिपक्षश्च दोषः। अनुबंधो नुबंधनं। निर्वर्तनं च। विश्वेषांकर्मक्रि
यातद्धि लोपनं छेदनं। नत्रोघतः। वक्षे विश्वकर्मा आदित्यः। विश्वकर्मा देवशिल्पी विश्वर्मा दिवाकर इस्त
नरतंत्रं विलोपनं तिरोधानं विरूपाक्षो विमर्द्दष्टिः चक्रधरो ग्राम जाली अक्षो ज्ञाभार्बर्धशाकट व्यवहारेषु पा
शे के इति मेदिनी करः। जनावर्ते हे च दे मभेदरथांगयोः। शस्त्रभेदे च सेनायो च क्रं चापि विहंगके इति रति दे
वः। अथ च विरूपाक्षः शिवः चक्रधरो विष्णुः शिवो विष्णुरिति विरोधः। शक्राश्च इंद्रघोटकः। उच्चैश्रवा बधिरः
बधिरो हिमहाध्वनिना विना न श्रृणोति। इंद्राश्च श्च देशजा नृ कुलीनानू प्रशंसितुं शालयस्यन देशः। समुद्रः

वास टी
४०
40

रगस्यविभिन्नस्यातिछिन्नस्यस्नेहंचेक्कारायंदर्शयतःहृदयंमध्यंतन्नादोमघनदंडोमथ्नातितथेत्यर्थः।।३।।शरोदध्यग्रभार

तज्ञातत्वेनंप्रशंसायस्यसतःसाधो।हृदयमभ्यंतरंविलोलयनिमथ्नातिविभिन्नस्यापिसंगस्यापिस्नेहमनुरा
गदर्शयतः।प्रकाशयतः।कइवकेस्येवतक्राटइवशरस्येव।यथाशरस्यदध्यग्रभोगेस्यादितिरत्नकोषः।भि
भौदारितंसंगताविलयमराःस्नेहोनुगश्चैकारायेतेलेपिवनिगघतइतिधरणिः।तक्रेअटतिगच्छतीतितक्रा
टः।वैषाकवोदधिचारःस्यात्तक्राटकरघूषराः।वितिहारावली।आत्मघोषेनिजस्फुतौ।मुखरोवाचालःमंड
लेषुदेशादौभ्रमरास्यरव्यापकःवयमात्रात्रदेशेकृतभ्रमराइतिरूपेरा।पक्षेआत्मघोषःकाकोमुखरा
यत्रा।मंडलातीतिव्युत्पत्त्यामंडलःकुक्कुरस्तस्ययद्भ्रमरांनत्कथकः।ध्वाक्षात्मघोषपरभृद्बलिभुग्वायसा राम ४०

अपीत्यमरः। कौलेयकः सारमेयो मंडलश्चागतत्रपइतिव्याडिः॥ स्ववशः स्वायतः। नपराधीनइत्यर्थः। यर्थेच्छ चेष्ट
इतिभावः। आलोलमुखश्चंचलवदनः। अवाच्यवाचित्यात्। यद्वास्ववशेस्वापनेदुर्जनएवालोलमुखः स्थिरंवदनः
स्थिरोपक्रमोवा। पक्षेस्ववशायांनिजकारिरायांलोलमुखंयस्यसतृष्णवदनइत्यर्थः। वशावंध्यासुतायोषास्त्री
गवीकरिरााांषुचेतिविश्वः। अधरीकृतदानोऽदातादानाधीनधर्मदूषकोवानिरंतरमधःप्रदेशोमदद।यीचासु
रमेमिनोज्ञस्ययानेनगमनेनविकलोहीनोऽसन्मार्गगामित्वात्॥ यद्वासुरभिपादेवमयेननविकलः न कि
रलोकत्वात्। अविशब्दोत्राध्याहार्यः। पक्षेसुरभेर्गायीनेनगनेनविकलोविह्वलः॥ गोत्रंवशःतत्रस्ववत्ननंपच्यव

स्तेन विधुरः अकुलीन इत्यर्थः। वामाध्या गर्हितमार्गः तत्रानुरागी। पक्षे गोत्रस्खलनं प्रियासमीपे प्रमादादन्यस्त्रीनामग्र
हणं। वामा स्त्री तन्मार्गासक्तः कले मधुरे स्वे श्रेष्ठे च मंदिमानमगौरवमावहति। धारयति। पक्षे कलेवरे शरीरे मंदिमानम
पाटवं। वंचकः शृगालः। कटपले मृतमांसे रक्तः। यद्वा वंचकश्चोरः प्रतारकश्च। कटः क्रियाकारकस्तस्य पले फलने
प्रतारणे रक्तः। यद्वा। कटपाले ऽत्यंतलाभे रक्तः। पक्षे कटशब्दस्त्रावाची तस्य पले शय्यायामनुरक्तः। श्व प्रतारक
चौरेषु वंचकः परिकीर्तित इति शाश्वतः। कटः समयबंधे वित्तरोधिमृतके पि चेति विश्वः। बलः प्रतारणे रौ कालेश
य्यामांसे पलं मतमिति धरणिः। यद्वा कटपले उत्कोचादौ रक्तः खल इत्यर्थः। विभो स्वामिन् अरिः शत्रुः रक्तश्चार्थी

ल्लोभातु। पक्षे विभावरी रात्रिः। क्वचित्तु कटफल इति पाठः। तत्र कटफले उक्तौ चादोरक्ताः। निश्चये कटशब्दो लोके प्रसि
द्ध एव सावधिसमयविशेषवितथा। अतः कटस्य फले प्रयोजने परवंचनादौ रक्ताः सः काले हरस्स वि हरइ तिहिवंच
कवचनमिति। परे तोमरताः। तापयतीति तापः। बधूनां तापं तापकारि दर्शनं यस्य यद्वा बंधूनां तापः संतापः स एव
दर्शनं दृष्टिर्यस्य मित्रसंतापस्य परमीक्षक इत्यर्थः। पक्षे बंधुता बंधुसमुहस्तस्मादपगता लोकः बंधुनेति। ग्रा
मजनबंधुसहायेभ्यस्तलिति समुहार्थे तल्प्रत्ययः। ज्ञातेयं बंधुतेषां क्रमाद्भावसमूहयोरित्यमरः। आलोको
दर्शनो घातावितिचापरस्तुः कुटारः भद्रश्रीः शोभनलक्ष्मीकः पुरुषः तमपि विवितापयति। किं पुनरलक्ष्मीकमित्य

यः स्वरसः। यद्वा भद्राणां साधूनां श्रियं लक्ष्मीं शोभां वा विनाशयति। पक्षे भद्रश्री श्चंदनं। सश्रीके चादने विस्याद्भद्र
श्रीः साधुसंपदीत्यधरत्निः। कं भूमिं दालयति खंडयतीति शकं ध्वादित्वात् पररूपत्वे कुदालः पदाह कुद्दालो विश
कं ध्वादौ कुमुद्दालयतीत्यरणीति। यद्वा पृषोदरादित्वादुकारलोपः। गोत्रा पृथ्वी गोत्रं कुलं चा। क्ष्मा पृथ्वी ज्ञातिश्चा
निकृंतति छिनत्ति उन्मूलयतीति यावत्। प्राणाः कृष्णो कोकश्चारनकीलः कुक्कुरः मैहनं च जघन्यमर्माहितव्यापारः।
सुरतं चात्र लग्नः संबुद्धः हे पययति लज्जावतः करोति। सूर्यां बिबश्चती करैः। यस्य स सूर्यश्चति हस्ती। द्विपा विश्चर्यी
श्चतिकुंमिसामजाइति हारावली। काननरुचिः इषदातनरुचिः॥ अपारश्चार्थिकी कृत्रिमां सुखच्छायां दर्शयतीति

भावः। अनुगतं भक्तं न प्रशंसति कीदृशं यवसं ततमपि युग्मिश्रोत्रः दोरघायवद्रक्तापति। तेनाभेदेन संततमे
कतापभ्रमित्यर्थः। यद्वा काननं कुत्सितमुखं कापथ्ये क्षयोः श्रोति चकारात् कादेशः तत्र रुचिर्यस्य दुर्मुखप्रीतिरित्य
र्थः। यद्वा अननं प्राणानं कुत्सितजीवनं तत्र प्रियः अनुगतं पश्चाद्गतमपि यवसं दक्षं ततं विस्तीर्णं नानुमोदते। प
क्षे काननं वनं अनुगतं दत्तं यवसं घासं ततं विस्तीर्णं नानुमोदते न खादति। यवसो दक्षघासयोरिति विश्वः। ततं वी
णादिवाद्येपि विस्तारे विततमनमिति च। अबीजादकारणात् अकांडादप्रस्तावात्। पक्षे व्रीह्यादेरंकुरस्य बीजा
त् आत्मकांडात् प्रकांडात् प्रभवः सुखच्छेद्यता च भवति। करालीयते कठिनी भवति। पारदः पारारस इति प्रसिद्धः। सो

बाम टी
४३
43

विगत्वरस्वभावतयानक्कचित्स्थैर्यमावहतीत्यर्थः बिंदुरिच्छुरितिनिनितोबिंदुशब्दःनेनविनोदयितुमिच्छोःपुरुषस्यश्रम
गाःपरिश्रमज्ञाइत्यर्थः।श्रिवमंजानंतीतिश्रमगाःसर्वंगत्यर्थाःज्ञानार्थाइतिवचनात्ज्ञानार्थता।पक्षेविनाउदविं
दोःजलबिंदुविनाश्रमगांपरिश्रमवंतःयद्वा।विनोदचिंदोगैरिगायनस्यश्रमगाःश्रमज्ञाइत्यर्थः।श्रवशावशगाः
श्रमवशगाइतिपाठद्वयंसुगममेव।भवादृशाःजनाःसुखंसुखकारित्वात्हरतिहृदयमितिशेषः।आवहतीति
पाठेभवादृशा।जनाःसुखमावहतिकुचंतेपक्षेसुखंजनाःशोभनंखंजरीटाःसहचेतनतयानेनवर्तंतेसचेतनताविज्ञाः
शुचित्वशुद्धतापयःशब्दवाच्यताजलदुग्धयोरयीतिमित्रतानामसाम्येनमत्सगंमादिति।जलीयभागस्यदुग्धोऽनु

राम
४३

वृतेरिति भावः। क्वायोऽस्मिन्नाको दुःखं चाक्षीयते वारीति कर्मिकर्तरीति प्रयोगः। वारितो निपाठे भाव एव प्रयोगः॥
उत्पथं अकुत्समपथं च। तस्मिन् मकारदेपरिमितिमल्पः क्रियाविशेषणमिदं। शत संख्या मत्यवः। क्रोधाइतिमध्यप
दलोपी समासः दितिदैत्यमाता अदितिर्देवमाता स्यादितिर्दितिवदैत्ययोरिति वचनात्। तत्रशत्रुममन्युरिन्द्रः दितेर्ग
र्भ इंद्रेण बहु खंडः कृत इति भावः तेन तथा हि। इंद्रहतसुतज्ञातजनिता मर्षीकुलहृदया दितिः स्वपतिं कश्यपमृषिं मा
राध्याऽमरनिकरं परिहृदयपरिभावकः सुतां मम भवत्विति वरं मयाच तत्तेन मुनिना च भक्तिभावितेन तस्यै तादृशं दत्वा
त्यंतशौचाचारेण गर्भ पालनेन तव मनोरथः सफलो भवितेति भणितं तत्पश्चात्ताशकेन स्वपरिभावाशंकिना मारावकस्य

वमास्या योपचर्यमाणादितिरेकदाऽक्षालितचरणा सुप्ताप लब्धोलब्धावसरः सुरवरो निपदुशतकोटिकोद्यादरपा
टनं कृत्वा गर्भं सप्तखंडमकरोत् तत्रैकैकं खंडं सप्तधाऽभेत्सीत् तेन चोनपंचाशत् खंडा उनपंचाशत् पवनस्कंधेष
णापरिणता इति । पंच्यत इत्यादीनि कर्मकर्तरि साधूनि । कथ्यंतेपीऽभवंति भवंति । यां श्रुत्वा बाल्यदशायां क्रीडि
तनिर्जीगामनिर्गतो बभूव । तत्वो हस्त चतुःशतं । तदुक्तं । किष्क हस्ते वितस्तौ च तत्त्वः किष्कु चतुःशतं मितिक्व चित्ता
र्मधेनुशतमिति पाठः । तत्र मार्गधेनुशब्देन योऽजनमुच्यते । तथा चोत्पलिनी योऽजनं मार्गधेनुः स्यादिति । अयाध्वा
नां गत्वा न विंध्यो गिरिरदृश्यतेति संबंधः । तद्विशेषणमाह । अगस्त्योदि । आब्रह्मांडखंडगतमिवगतं । अगस्त्य

वचनसंह्रतमा ब्रह्मांडखंडगतशिखरसहस्त्रंयेन।यद्वा अगस्त्यवचनसंह्रतमत एवनब्रह्मांडखंडगंतंशिखर
सहस्त्रंयस्यसतथा।संबाधः संकटः सबाधशब्दस्यभोगेऽनतिप्रसिद्धत्वात् ग्राम्यतानास्ति।कछक छालीतिप्र
सिद्धः।कटकः पर्वतैकदेशः स्यंदमानंक्षरात् हरिचंदनंचदनविशेषः।पुंसिवाहरिचंदनमित्यमरः।शाम्नगाव
तरः।जीवंजीवश्चकोरः लेलिह्यमानमास्वाद्यमानं।शबलंकर्बुरितं।ऋक्षोभल्लूकः ग्रावयोगवरइतिप्रसिद्धः॥
शारभोष्ट्रचरणाः केसरीसिंहः वानरविशेषः।कुमुदः कंपींद्रः कुमुदः कोविकुमुदः कोविदिग्गजइतिशाश्वतः॥
कुमुदंकैरवंकुमुदोदिग्गजोवापादयोवृक्षः॥पक्षेऋक्षादयोवानरविशेषः पादस्यपतनं।पतनंपत्रसपादवत्

वास टी
४५
45

पादपीठं एतैः सेव्यमाना पादपतः पीदपीठस्य छायायास्यसनथा। पादछायइत्यतिपादः तत्रपादाः प्रत्यंत पर्वता
इत्यमरः। नागो हस्ती वासुकिश्च। गजपक्षेनिश्वासो गजशब्दः तेन क्षिप्तास र्वेतः विस्तृता भूतिः ऐश्वर्य्ये विंध्येगजाः
संतीतिभूतिर्गैरिकादिधूलिर्भस्म च। वनमाला काननपंक्तिः हरिमाला च। आपादप्रवरांमालां वनमालेति नां बि
दुरितिशाश्वत सहस्रकिरणाः सूर्यः सप्तपत्रः छदिमन इति प्रसिद्धः स्यंदनोऽतिमुक्तकः। तिनशः स्यंदनोनेमीरथ
द्रुरतिमुक्तक इत्यमरः। पक्षे सप्तपत्रैः सप्ताश्वैः स्यंदनो रथः विरूपाक्षो हरः। गुहः कार्त्तिकेयः सेनानीरग्निभंगु
ह इत्यमरः। गुहा गिरिकंदरा च। शिवा गौरी आमलकी च। शिवा गौरी शिवा क्रोष्टीभवेदामलकी शिवेति शाश्वतः। कां

राम
४५

तारोवनं उरवरः क्षारदेशः सानुश्च ॥ नैर्गतिः प्रादाः कमि हितः ॥ यद्वा कांतारो खरप्र धातोयः सानुस्तेन गतः संग
तः ॥ समदनो मदननामकवृक्षयुक्तः पक्षे कांतायारो षरसेनकोपानुरागेस्तानुगताः समदनः सकामश्च ॥ मल्लि
कापुष्पविशेषः अर्जुनो वृक्षभेदः ॥ पक्षे श्रीपर्वतवासी मल्लिकार्जुनो नाम हरः ॥ नरवाहनदत्तो नाम राजा ॥ प्रियं
गुः फलिनी शामालता अतसूहितः पक्षे नरवाहनतवधूः प्रियंगुश्यामा नाम्नी ॥ प्रियंगुः फलिनी फलीत्यमरः ॥
धात्री उपमाता ॥ आमलकी च ॥ धृतिर्निर्वृतिरवस्थानं च ॥ अरुणाप्रभया लोहितरत्नदीप्ता पाटलिता इषद्
क्ता संजाता पाटलेव वा वनराजिर्यस्य ॥ पक्षे अरुणाः सूर्यः तत्सारथिर्वा तस्य प्रभया पाटलिता वनराजिः पानी

यसंहतिर्यंग्रासतथा। पाटलावृक्षभेदे स्यादीषद्रक्ते विपाटलइति विश्वः। बहुलता ताम्रचुरता नीलता चावकुं
तं कृष्णपक्षेऽग्नौ सिते च बहुला भावी ति विश्वः। शतं संख्याभेदः कोटिः संख्याभेदेः दानं त्यागः। यद्वा शतसं
ख्यावच्छिन्नं यत्कोटिद्रव्यं तस्य दानं त्यागः द्रव्यसंख्याभिदो कोटिरिति विश्वः। पक्षे शतकोटिवज्रं तेन दानं
खंडनं चीर्ण्योगागेयः शिखंडी मारतरणायोधः मयूरश्च अर्धचंद्रः क्षुरप्रबाणो बर्हभारश्च। अर्धचंद्राकृ
तियोगादर्धचंद्रो मयूरपक्षः आचितोऽमः विन्यासोग्रथनाम ह्लनागो हस्ती मुनिविशेषः कामशास्त्रवर्तीच
कांतानां प्रियसंभोगरूपो रसामोदो यत्र। यद्वा कांतायाः प्रियंगोरसामोदोरसगंधो यत्र। पक्षे कांता॰ सुंद

रीणां रसो मोदो शृंगारहर्षयित्रग्रंथे स तथा। शंवरो दैत्यविशेषः हरिणाविशेषश्चरंकुसं वैरयो हिंसा इत्यमरः। शं
मार्गणां प्रार्थनं। उपास्यमानः सेव्यमानः अगं पर्वतं स्त्यायतीत्यगस्त्यस्य ष्टैप शब्दसंघातयोः। अतोनुपसर्गे
कः स्त्रस्तोधः। पतितो त्रजालोयस्य कैः। जरें तोजीर्णायेऽजगराः सर्पभेदा हस्तझो गैः शरीरैः दंतो गिरिनि
तंबो दशनश्च दंतो गिरिनितंबे च दशने सानुनि स्मृत इति विश्वः॥ दंतस्तिपद्धि। वीत शिला विशेष इत्येम
पिंडालम्बुकं पिंडीभूतमलक्तकं। संचारितं संचरणां भावेक्तः शचीपतिवारविलासिनी उर्वश्यादिः आ
कुलानतः कोष्ठछिद्यांनलिन उस्तवातां नु। सहंशभूषितं श्रोष्ठवेणुभिरलंकृतः अथ चाकुलीनो हीनवंशः

वास टी
४७
47

शोभनगोत्रेण भूषितइतिविरोधाभासः।अविरोधस्तुदर्शितएव।एवमन्यत्रापिविरोधवुद्धेयो।अभयाहरीतकी।अभया
त्वव्यथापथ्येत्यमरः।म्रस्फफलोमहाकालफलम्रस्फफलोमहाकालफलेकेदल्याम्रस्फफल्यपीतिविश्वः।प्रस्थःसानुः
अपरिमाणोऽनवच्छिन्नः।अथचप्रस्थपरिमाभेदः।सकथमपरिमाणः।भावाभावयोर्विरोधात्।तुप्रस्थःसानुरस्त्रियामित्य
मरः।प्रस्थाढकौसमासभ्नावितिच।सर्वइतिसर्वनामप्रसिद्धःऽर्थः।नहतीतिनदः।सहनदेनप्रस्रवणेनवर्त्तितइतिच।अथव
घःसनदःशब्दवान्कथंनिःशब्दइतिविरोधः।भीमोभयानकःपीडवभेदश्च।कीचकोवंशविशेषोराजविशेषश्च।कीचक
स्यभीमोवैरीवेणवःकीचकास्तेस्युर्येस्वनन्त्यनिलोद्धताइत्यमरः॥अंबरमाकाशंवासश्चविहितमपवारितमंशुकंकिर

राम
४७

राघवासश्चकिरणापक्षेस्वार्थकत्वागुल्मोविटयोरागभेदश्चधातवौगैरिकादयः पितादश्चासानुषुपर्वैनैकदेशषयोग्रहा
णामादित्यादीनांप्रचारः संचरणांतेनप्रकाशितमहत्वः पक्षेअनुग्रहेणासहितसानुग्रहः प्रचारोयस्यपक्षपातप्रवृत्याप्र
काशितमाहात्म्यः।दिककाष्टाअंबरमाकाशंतयोदीनंविहितमाछादितंयेनपक्षेदिगंबरोबौद्धविशेषः क्षपणाकस्तदर्शनं
तत्सिद्धांतः।यद्वामीमांसान्यायोमीमांसाशास्त्रयुक्तिः विहितस्तिरोहितोदिगंबरस्येश्वरस्यजगत्कर्तृदर्शनंकर्तृत्वादि
र्येनसतथा।नीयतेप्राप्यतेविवक्षितार्थसिद्धिरनेनेतिन्यायोयुक्तिः प्रथमपक्षेमीमांसाचन्यायश्चेतिव्युत्पत्तिः।द्विवच
नाभावस्तद्विधेरनित्यत्वात्।यद्वा।मीमांसासहितोन्यायइतिशाकपार्थिवादिःयश्चदेवरवानेगुहाभिरूपशोभितो

पांतइतिसंबंधः पुष्करकमलंतीर्थंचाप्रादुर्भावउत्पत्तिः कथनंचामीनमथुनमस्त्ययुग्मंकुलीरःकर्कटकः पक्षेमीना
दयोराशयः।अत्रसंगतैस्तस्वरूपैरित्यर्थः।करटानिउयोनिशास्त्रेप्रसिद्धानि।शकुनिः पक्षीनागःसर्पोहस्तीवाभद्रो
मुस्ताभेदः बालोह्रीबेरः बकुलोवृक्षविशेषः।पक्षेशकुनिनागभद्रव्यालवाः करटांनितेषांकुलंसमूहः देवखातवि
लेगुहेत्यमरः।लतामिर्दर्शितानेकवृत्तविलासोइतिसंबंधः।वृत्तविलासश्चेष्टाविलासः छंदोविलसश्चविलासःसाम्यं।
कुसुमैःपुष्पैर्विचित्राभिः।पक्षेकुसुमविचित्राछंदोभेदः।वशपत्रेषुपतिताभिः।।पक्षेवशपत्रपतिताछंदोभेदः।एत
न्मतेस्त्रीलिंगोयंशब्दः।।अन्यत्रक्लीबएवेत्यवधेयं।सुकुरामृह्रीललितानामनोहरा।पक्षेसुकुमारललिताछंदोभेदः।।

पुष्पितं संजातकुसुममग्रं यासां ताभिः पक्षे पुष्पिताग्रा छंदः। शिखरिणीभिः शिरयुक्ताभिः। पक्षे शिखरिणी छंदोभेदः। प्र
हर्षिणीभिः प्रहर्षयुक्ताभिः पक्षे प्रहर्षिणी छंदोभेदः। यश्चारे वयातघा उपगूढः संबद्ध इत्यन्वयः सारसः पक्षिभेदः रसि
तं शब्दितं। उद्भुतो भीतः भास्करो मत्स्यविशेषः भाकुर इति प्रसिद्धः। कच्छ उपांतः घटः समूहः मकरंदः पुष्परसः। पुलिंदः
शबरः। पुणामहत्वे इत्यस्मात् कुणिपुणोः किदव्रिति किंदच् प्रत्ययः। अत्रा घाटे कपाटः। प्रासाद इति केचित्। परूढमद्भु
तं नि कुरबः समूहः निघ्नवनं सुरतं। दात्यूहः पक्षिविशेषः कोटाडाउक इति ख्यातः व्यूहः समूहः कुलालः कुंकुटः कु
कुभः पक्षिभेदः। तयोर्घटा समूहः घूत्कारोऽव्यक्तो शब्दः कुलालकुकुटप्राडुः कुकुभं कुहूकस्वरमिति हारावली। जलमा

तुषः प्राशितिभेदो वतमातुषवनुात्वयेधूर्तिः बंटाबकः च कोवकोटकश्चैववबलाकातुबकीस्पतेति हारावली। कुटुंबिनी
स्त्री अर्धशफरोडुंडामत्स्यः दृडुपालोऽर्धसफरकं कोत्रोटो तलव्यधाइति हारावली। क्षुद्रमत्स्यसंघातः पोताधानं पो
ताधानः पहनातत्स्यः कोयष्टिकः कोषताडकइतिप्रसिद्धः स्कमतं षमषमोशबूः। उदंडपालोमत्स्यभेदः उंदुआ
र इतिख्यातः उदंडपालः रुसिस्यासर्पमत्स्यप्रभेदयोरितिमेदिनी। खरशकुलउद्दंडुपालऽस्यादिति हरावली। राज्जि
लोडुंडुभः करााचीनः खंजरीठः करााचीनः खंजलेरवस्कखंजनइति हारावली। तस्मैपुन्नं चनिधेरवस्यातं सूचय
तियदा हराहमिहिरः॥ तस्मिन्निधिर्भवतिमेपुनमेतियस्मिनूययस्मिनूपुनर्वमितितत्रेतलेस्तिकाचः। अंगारेम रा म
४९

प्युपदि शांतिपुरी पतोस्यनत्कौ तु काय नयनस्यरवने द्वरित्री मिति। मुखं श्रोतो विशेषोवदनं च मु। खं निःसरणास्ययोः
रिति धरणिः मुह्यानइ निरव्यातं निःस्वरणां भंगोत्तु कुटिरुर्मिश्च भगस्तरंग उर्मिर्वा स्त्रियमरः। गतिर्गमनं प्रवाहश्च। वेला
वारिकलं वा यदाह वलाकुलेप्यि वारिधेरिति अत्र वारिधेरि-पलक्षणां वेलातन्नीर नीरयोरित्यमरे पितः। ध्याका
लश्च कबंधजलं मस्तकहीनशरीरं च। राक्षसो वातथा च विश्वः। कंबंधसलिलेरुटे कबंधो राक्षसां वरे इति। श
तपत्रं पद्मं मधुरश्च शतपत्रः सितायांगः प्रचलाकी च चंद्रकी चेति हारावली। विषधाराजलप्रवाहः य द्वापि
हितं शतपत्रैयेन संशयतत्रा विहितः जातिकालमुखादिस्यः। परवचनमिति पातः इद्दशो विज्ञमभ्माशो विषध

रोमेधोयस्यासातथा।विषंधारयतीतिकर्मणायुणातोद्विषधरोमेघः।वक्षे सर्पश्च।विषंक्ष्वेडजलेपि चेतिविश्वः।धनकाम
यानर्त्तकादिस्त्रिया।यद्वाधनंकामयाधनेछया।भूभृत्तुपर्वतोराजाचान्तरंगएवहस्तइतिरूपकं।शेखरोमस्तकालंका
रः।हरिःसिंहः।वारणाहस्ती।कुंभसंभवमगस्त्यं।आह्वयतीव।आगच्छागच्छेत्याह्वानमिवकरोति।अत्रस्यधीयाअ
भवान्नात्मनेपदं।आह्वानेहेतुगर्भविशेषणद्वाराकरणमाह।उच्चेति।उच्चनालएवभुजोयस्यसतथा।अन्यद
प्याह्वानंहस्तेनध्वनिनाचक्रियते।इयमार्या।वश्यत्यादिकेसरिसिंहःकरिदन्तौक्रममुत्क्रम्यदिक्कुरतइतिप
श्यत्यन्वयः।कीदृशः।उदंचदुत्तिष्ठन्नवांचदधोगच्छन्।अंचितंपूजितंवपर्यायायोगयोः।पश्चार्द्धपूर्वार्द्धयोस्ते

मज्जतीतिमाकृ।स्तस्वीकृत्यउतानितदृष्टनिष्टितंदृष्टस्थितंमनागीषद्बुग्नाग्नंयल्लांगूलंतद्धारकःदशतानग्रविषममु
खगह्वरः।उच्छ्रावितकर्णीःसटांस्कंधवालमुत्कटामुच्छ्रितांकुर्वन्नित्यर्थः।अनेनक्रममाराास्यदृशामुक्ताऽपरेरा
क्रांतगजस्यसिंहस्यदशामाह।उत्करीइति।अयंपुरोवर्तीहरिःसिंहःश्चित्रेणाधिलिखितंनशक्यतइत्यन्वः।अ
कांडमकस्माद्यौश्वंडिमाप्रचंडतातेनकटुर्भयावहःस्फरस्मितिशापितंक्रूरेणाभ[redacted]यंकरेणाकारेप्यसंस्थानेतक
रालंनिम्नोन्नतमुखचंधुर्यस्यसः।चीत्कुर्वन्नव्यक्तंशब्दंविदधानंक्रिरस्यवकुंभस्थालंभवतीतिगतार्थता।निर्याशि
रसिकुंभस्थलेचव्याघ्यास्थितइतियोज्यं।अनंतरेविंध्याटव्याकतिविषयदानिगत्वाजंबूद्देक्षस्यशीतलच्छायायांवि

शश्रामेति संबंधः कूलंते नोपचितया अल्पाशयस्येत्यर्थः। त्यकु अधः प्रदेशावररां वातेन हिती च नदीस्वल्प लभा
सोति। बृहस्त्लोवर इति रव्यातस्त्स्ताविशेषः। अर्जतश्वार्टक्कायाया ज्राटक्कायात्रा मरुदेशे टक्कयात्रा अत्र सप्तमी
योगविभागात् समासः। गमतो ऽसवयोर्यात्रेति विश्वः। घनो मेघस्तस्य सारपानीयं तदर्थैवः सार्थो लोकसमूहस्सू
हाहित्यापक्षे कर्पूरः वृक्षभेदो वा घनसारस्तु कर्पूरे वृक्षक्षेदे जलेपि चेति विश्वः। त्यायेच तीरे च घने च सारमि
ति चात्र मरुदेशे जलवाहिती सार्थो टक्कीशब्देन यात्रां पानीयाहरणाय करोतीति प्रसिद्धः। नानाविटपिषु इतः
संजात आसवो यस्या सा तथा। पक्षे नानाविटैर्नयीत आसवो मधं यस्या सा तथा पक्षे विटो नायकेसहचरभेदः

तथाचमल्लनागः।तत्रस्थोनिरवतांयानःसकलत्रोगुणान्वितः।वेशयोलीबहुमतोविटस्तद्रूपजीकइतितेनयीत
आसवोमयंयत्रंनलकूबरःकुबेरपुत्रःपुत्रस्तुनलकूबरइत्यमरः।रंभाकदलीअप्सरोभेदःश्च।साचनलकूबरे
रासहकामसुखमनुभवतीतिवार्त्ता।घंटारवाशरापुष्पीतयाप्राचुर्येणाविदितमार्गयापक्षेघंटायायोरवःस्रेबृ
स्लेनासंमंतात्करिराविदितोज्ञातोमार्गोयस्यांतया।बहुफलोबहुपारकृरेक्षबहुफलंभूरिलाभश्चकीचकोऽ
सुरोविराढश्यालोवंशभेदश्च।मदनशलाकासारिकामदनशलाकासारिर्यापाढशालिनीतिहारावली।प
क्षेमदनशलाकामोहोधकेवर्त्तिभेदः।तथाचोत्तिनीमदनशलाकासारिवर्त्तिश्चकामदीपिनीति।तथाच

वास टी
५२
52

गर्गः। मदनशलाकां कामी सिद्धो बधमप्ययं वहति। मदनशलाका नखपदमिके। चित्रा मरीचिमाली रविः। चरमाच
लं पश्चिमगिरिः परिचयो ज्ञानं अशनं भक्षणं। संकल्पश्चिंता तूलिका लेखनीभिः स्यंदं करराग्रामः चलनं श्रूत्येंद्रि
पवर्गः। मिथोन्योन्यं अतिपाठोऽतिक्रमः अनुरूध्यमानः शापथादिनाभ्यर्थमानः अस्ति कुसुमपुरं नाम नगर
मित्यन्वयः कीदृशं वेश्मभिरुड्डासितं कीदृशैः सुधाऽमृतं छुह इति प्रसिद्धलेपनद्रव्यं वातहृद्दवलैः बृहत्ता थावडा
ह इति प्रसिद्धराज्ञः कथा। लंभो लंभकः। शालभंजिका विद्याधरी दारुपुत्रिका च शालभंजी दारुगर्भीकुरुटी पाद
पुत्रिकेति हारावली॥ वृत्तैः छंदोभिः माराकानां पोतानां क्रीडितं विलसितं पक्षे मारावक क्रीडित छंदोभेदः मंत

राम
५२

वारत्तोहिंगुलितकाष्टदंडिकाधरत्तिभेदः मतहस्तीचागवाक्षोजालमार्गोवानरभेदश्च।वलिभवनंवल्गिगृहं
सुतलेपा तालविशेषेसंन्निवेशः संस्थानंयेषांतैः पक्षेसुतलः शोभनः संन्निवेशोगृहांतकोष्टकंयेषांतैः तल
शब्दः स्वरूपेयद्वाशोभस्तलः शोभनमूलः सन्निवेशोयेषांतैः।।धनदेनाप्रीत्यादिजनेनानुगतमितिसंबंधः
धनदः कुबेरोधनदाताचाप्रचेतावरुणः प्रहृष्टवितश्च।अथचयः कुबेरः सकथंवरुण इतिविरोधः अवि
रोधस्तुदर्शितएवमत्यत्रापि।अजापालः पशुरक्षकः अजैरुपलक्षितांपशुरक्षकेइत्येवबोद्धव्यंपशु
रक्षकत्वंचवैश्यधर्मः।तदुक्तं।पाशुपाल्यंहृषिः वराय्यवैश्यस्याजीवनमतमितियद्वाअः केशवः तस्माज्जाऽतो

जः कामः तमापालयति। संवर्द्धयति शृंगारीत्यर्थः भेनरामोरमतीयः अथ च। अजापालोरामपूर्वपुरुषोरामोद
शरथिर्नभवति तस्य ततोभिन्नत्वात्। प्रियंवदो विद्याधरभेदः प्रियवादी च। पुष्पकेतुः कामः पुष्पचित्रुश्चयद्वा
पुष्पकेतुः पुष्पपरिधानशीलः शृंगारीति यावत्। यदा हमरतः। सुखप्रायेष्ट संपन्नेऋतु मात्यानुसेवकः पर
पः प्रमदायुतः शृंगारीत्यभिधीयत इति। भरतोदशरथोपुत्रः भरभारततोतीनिभरतः ततोतेडः। यद्वामेषुनस्य
त्रेषुरतोनुरक्तोऽत्योतिषिकः शत्रुघ्नोदशरथसुतोरिपुघातकश्च। तिथिपरोऽष्टम्यादिपालकः अतिथिरभ्याग
तः। तस्यूजापरेरा अअसंख्योऽविद्यमानगरातः अतिबहुलत्वात्। संख्यावान् पंडितः संख्यावान्पंडितः कवि

रत्यमरः। मर्मितत्वं गात्रावयवश्चा वीरतरः सुभटकांडश्च तथा च हारावली। अजिह्मगो वीरतोऽस्त्रकंटक इति। अप
तितः पातित्यरहितः सर्वो यज्ञः आसवो मद्यं च। अथ च यो नित्यं मद्यपानासक्तः स ब्राह्मणादिघातकतया पतित
एव भवतीति प्रायो दर्शनानुरोधोऽत्रेति मंतव्यं। अथ च यो नित्यं मद्यपानासक्तः स पतितः भूमौ पतनवान् भवति सु
दर्शनः शोभनालोकः विष्णुचक्रं च। अचक्रो ग्रामजालं शून्यः चक्रः कोके व्रजे षुंसि ग्रामजालसमूहयोरिति वि
श्वः। मदो गर्वो दानं वा। सुप्रतीकः शोभनावयवो दिग्गजभेदश्च। अंगं प्रतीकोऽवयव इत्यमरः। अपक्षपातः पक्षा
श्रयशून्यः मध्यस्थ इति यावत्। यद्वा। रविक्षो पक्षपातोऽनुरागो यस्य तेन। हंसो विशुद्धः श्रेष्ठो वा निर्लोभो वा

पक्षिभेदश्च। तथा च विश्वः। हंसो विभेदे तिलोमे श्रेष्ठे च विहंगांतर इति। विरोधपक्षे। अपक्षायातितोऽपक्षगम
नशीलेनेत्यर्थः। स्नेहोऽनुरागस्तैलं च। प्रदीपो घातकोदीपश्च। अंग्रंथिर क्रूरः। अविद्यमानपर्वा च। वंशयोरुः कु
लबालकः। कोरीरश्च। वृषो धर्मो राशिभेदश्च। तपसि व्रते आरंभिराक्रे तो द्यामेनीयद्धा तपस्याया आरंभिता॥
पक्षे तस्यः फाल्गुनमासः। स्यात्तपस्याः फाल्गुनिक इत्यमरः। अग्रहेरा अकठिनेन। अग्रहितेन वा॥ अ
न्यत्रग्रह सूर्यादिस्तन्निषेधोऽग्रहः। काव्यमाघादितस्य जीवस्तावद्यत्नेन। अन्यत्र काव्येः शुक्रः जीवो
गुरुः ज्ञो बुधः। घनागमे तेवेश्यादि वेश्याजतेनानुममतमिति संबंधः। घनागमो वर्षाकालः। खंडाभ्र खंड

मेद्योदंतक्षतभेदश्च तथा च वामनः विचित्रमीषत्परिमंडलंवक्षतैः समंताद्विषमरूपेतं। खंडाभ्रकंतदशना
ग्रलेरवबिंबाधरोत्संगविभूषणायेति। अपो विमर्त्ति अभ्रमूलविमुक्तादित्वात्कः। दंतक्षतस्यापि तदाकार
तयाभ्रपदवाच्यता। धातुभेदव्योमवाचकयोरभ्रपदयोरपि भेदवाचकाभ्रपदेनश्लेषेऽनतिचिचेतिद्वि
लेरस्रमित्यवधेयं। प्रवालो विद्रुमे मणिः। रत्नताभ्यां मंडनं यस्य अन्यत्र प्रवालमणिर्मीमदंतक्षतविशेषः।
तथा च वामनः गाढदंतौष्ठसंयोगात्तु सप्रवालमणिर्भवेदिति। यद्वा प्रवालः प्रकृष्टकेशः मणिश्च ताभ्यां
मंडनं यस्य तेन। इंद्राणीशक्रस्य वनितारतबंधविशेषश्च। तथा च स्मरतः निजकक्षद्वयसंगतजानुभ्यां

भावति चाभ्यासात्। इंद्राणाया रचितत्वादिंद्राणीत्याख्यायां बंध इतिः। पल्लवो विदग्धः किसलयश्च। पल्ल
वः किसये स्त्रिंगे विस्तारे विटपेपि चेति विश्वः। पल्लवितो वर्द्धितः। परमत्यर्थं पुष्टः उपचितः यद्वा पोषणात्पु
ष्टः भावे क्तः परस्मात् पुष्टयो बतां यस्य ते भवेश्यात्कोकिलयोः परतः पोषणाय सिद्धमेव। कुसुमे पुष्पेषु
लालितं विलासो यक्षे कुसुमे बाणाकामेन लालितेन करवऊँ कं संप्रदितात् स्वार्थिकोऽणप्रत्ययः ज
लमौकसं यस्य स जलौकसः इति पुल्लिंगोऽकारांतोऽयं शब्दः तथा च पूर्वप्रयोगः जलौकसे वीरिचरैः प्र
तीर्यसूरैरिवाबद्धमिदं बभूवेति। शाब्दिकैस्तु जलौकोभिः कथितोपं जलौकस इति शब्दप्रकाशावि

अहरेतुस्त्रियांशुक्तिजलौकसइत्यभिधानंजलौकसशब्दस्यैकरूपकथनमात्रंनतुनियमइत्यवधेयमिह
सहृदयेन।रक्तंरुधिरंअनुरक्तौश्चसुरतंनिधुवनंसुरतादेवत्संच।महानटोहरःतथाहारावलीकटाट
कोमहानटइति।भुजंगःसर्पोविलासीच।भुजंगोहिविलासिनोरितिविश्वः।बिलेशासितुंशीलयस्यस
विलासी।सर्पः।कामुकश्चअथासुरोद्वाकिंरूपाध्यायःसकिलभैरवेतामूलैर्मित्याउद्दमनोलिलइतिपु
राताकथापक्षेमूलावेश्याःतासामुपरिगतेनश्रेष्ठेनंकुसमपुरंपाटलिपुत्रनगरं।तदुक्तं।सकुसुमपुर
परमित्याकुः।पुरंपाटलिपुत्रकमिति।यत्रचेति।यत्रभवती।तत्वज्ञानादिसंपन्नाकात्यायनीदुर्गावेताला

भिधाना। वेताला नाम्नी प्रतिवसतीत्यन्वयः। दावोवत्नवह्निः। प्रणायेतिकुपितानापिकापादप्रणामेतानुती
यप्रसादानीयातथा चभरतः पादपद्मप्रणामेत कुपितां तां प्रबोधयेदितियस्यपरिसरे च भागीरथी प्र
वहतीति संबंधः। धर्मप्रधानोद्भवः धर्मस्वरूपो वाद्भवो धर्मोद्भवः सगरो राजर्षिभेदः तत्सुता गंगाजलसंस
र्गात्स्वर्गं गताः। तथा च पुराणां। इंद्रपदाकांक्षी सगरन्नृपः पूर्वमश्वमेधार्थमश्वंव्यमुंचत्। इंद्रस्तमुपाहृ
त्य यातालोकपिलमुनौ समर्पयत्। ततस्तज्ज्ञात्वा तत्सुतशतेर्भूमिं खनित्वा पातालं गत्वाश्वो गृहीतमनि
क्षिररोषात्तान्भस्मीचकार ततो गंगाजलेसंप्लवकीनां ते स्वर्गमवाप्नुरिति कटोगंडस्थलहरिचंदनं चद

विशेषः स्यंदः क्षरतां वोतिः प्रवाहस्तत्तोहरितास्त्रिन कं चिद्धं यस्य सः एतां तिलकश्चंद्रः ॥ समकुटेय
स्यसहरः जटाजूटः जटासमूहस्तस्य कूटोराशिः कूटोस्त्रीलिखनेशशाविति मेदिनीकरः भ्रांतिर्भ्र
मणमावर्त्तीभसांभ्रमइत्यमरः ॥ सार्वभौमः सर्वभूमेरीश्वरोदिग्गजविशेषश्च करोहस्तेन राजन्या
द्यभागश्च स्पर्शः स्पर्शनदानं च स्पर्शः स्पर्शनदानयोरिति विश्वः ॥ कुमुद पुंडरीरीकौ दिग्गजौ कौबेर
श्वेतपद्मे च ॥ छंदोविचितिर्ग्रंथभेदः मालिनीछंदो विशेषश्च पानगरी च तथा चोत्तरतंत्रे ॥ विशालोज्ज
यिनी प्रोक्ता पुरी च पाच मालिनीति ॥ मानीनदी विशेष इति केचित् ॥ अंधतमसं पापंगाढांधकारश्च

वास टी
पृ०
57

तमसा नदीविशेषः। वीचिः। कल्लोलः तया कलिता नद्या अविचिः नरकभेदः। दुः शब्दो निषेधवाची। दिशि दिशि
उपलवनपादपैरुपशामितमिति। अन्वयः। कुसुमनिरमिवेति सहोपमा। उत्तंभितउन्तोलितः अनुरुरादित्यसार
थिः। अस्थानां ताडिनीकशेत्यमरः। चमूरुर्मृगभेदः। अकालः वर्षर्तुभिन्नः कालः यद्वा अः केशवस्तस्तस्य का
लः प्रातः कालः संध्याकालो वा। रामा स्त्री। यद्वा सनूश्रेष्ठोय आरामस्तदाश्रितैः पक्षे रामो राघवः अरिकेलीश
त्रुक्रीडा पक्षे नारिकेली अस्यो नारिकेल एव अस्यार्थे ङीप्। असंस्कृतनररता। ग्राम्या युवानस्तेहि कटाक्षानभि
ज्ञा भवंति। अक्षो विभीतकः पक्षे अत्यर्थं प्रसारितलोचनैः। केसरो बकुलो नागकेसरो वा पक्षे केसरः सटा

राम
५७

अरिष्टोनिंबोहरिठइतिप्रसिद्धोवा अरिष्टः फेनिले निंबेलशुभे काकंकयोरिति विश्वः। पक्षे अरिष्टमररा सू
चकंलिंगंचिरजीवीवृक्षविशेषः। सीबरिरिति केचित्। अदितिर्देवमाता तस्यै जठरसुंदरं देवकुलं सुरस
मूहः प्रासादश्च तथा च हारावली। प्रासादो देवकुलं तच्चैत्यं विनासरवमिति। सुरालयो देवस्थानमघस्था
नं च। भोगिन ईश्वराः सर्पाश्च यत्र श्रृंगारशरवरोतामराजा प्रतिवसन्तीति संबंधः। केदारः क्षेत्रं। बहुधा ब
हुप्रकारैरन्यकार्यसंपादकः। सर्वोपकार इत्यर्थः। अन्यत्र बहुप्रचुरं यद्धान्यं कलमं तदेव कार्यं कर्तव्यं तत्सं
पादक उत्पादयिता। बलं शत्रुसैन्यमितत्तीति बलमित् इंद्रश्च। पावकः पावित्र्यकारी अग्निश्च। धर्मप्रधा

वास टी
५८
58

नोराट्राजाधर्मराड्मध्यमपदलोपीसमासः।स्राज्ञिराट्पार्थिवेत्यमरः।यमश्चकृगनोक्तिनिर्ऋतिः सर्वगत्य
र्थाज्ञानार्थाइतिवचनादृतिर्ज्ञानमासितिः।शेषेत्यायस्यसतथा।सर्वज्ञइत्यर्थः।यद्वाकृतइसौत्रोधातुर्दीर्घार्थे
पठ्यतेघृणा।वञ्जुगुप्सानतन्इतत्कृप्यादिभ्यइतीकप्रत्ययः।निर्गताकृतिरस्येतिनिर्ऋतिः।नायंकेनापिजु
गुप्सइत्यर्थः।यद्वानि।कृतिर्निर्गतस्पर्द्धः नकेनापिसहस्पर्द्धतइत्यर्थः।सर्वोत्कृष्टत्वात्।कृतिघृणाराति
स्पर्द्धासुवर्ततइतिधातुपरायणवचनात्स्पर्द्धार्थोप्ययं।पक्षेराक्षसराजः।प्रचेताः शोभनचित्तः।वरुणा
श्च।सतामासमताभावेनगतिराश्रयः।पवतश्च।धनदोधनदाताकुबेरश्च।शंकरः कल्याणकरोहरश्च।

राम
५८

एभिर्विशेषणैरष्टमूर्तिर्व्याप्तशरीरः अष्ट इत्यसूच्यासोक्तप्रत्ययः। यद्वा अष्टलोकपालानां समाश्रितया अष्टमूर्तिः अ
नष्टमूर्तिरविनश्वरदेहः अष्टमूर्तेरत्यस्य विरोधस्तु व्यक्त एव। सुराणामित्यादि सराजा शृंगारशेखरः सुरे
शमिंद्रं तृणामिव विजयते तथाह्यसौ सोस्तु सुरेशः इंद्रः सराणां मघानां पाता पानकर्त्ता ध्वनिना च देवानां रक्षक
इत्यर्थः। सराजा पुरतिशयितवुरायं चितः अत एवास्य जयः तस्येंद्रस्यास्थानेऽप्युक्तो महानुग्रहः अत्यापग्रहि
त इत्यर्थः। ध्वनिना च तस्यास्थाने समायां ग्रहो गुरुर्बृहस्पतिः। सराजा उचितमार्गनिरतः कृतचित्तः अत ए
वायं जयी तस्येंद्रस्य करो हस्तः अत्यर्थमितिशयेन शातसंख्यावछिन्नायाः द्रव्यकोटेः प्रतापितां दाकत्वं वह

नितत्वतः शतकोठेर्वज्रस्य प्रत्यायितां वहति। सुतुरां जासर्वमेव दातादददातीतिजयः दातेति साकाशिरोत्क्रनूनेननले
काव्ययनिष्ठारखल धीन्द्रराणामिति सर्वभस्वमित्यत्रनब्धी। जीवेत्यादि। सुधमुविसंग्रामेऽस्मराजा धनुपश्चावयस्यजे
जीवाकृष्टिं गुणाकर्षणां अ च के कुत वानूशत्रराता सुमर्दतआसीत्। धनुर्गुणावर्षणादेव शत्रवो म्रता एवेति भा
वः। अथच जीवाकृष्टिं प्राणाकर्षणां अस्य मार्गणानां याचकानाम रिवत्ते शत्रुसैन्ये लक्ष्याप्तिर्लक्षदानत्वा
मोऽभवत्। रूद्दानेनया ह्यशस्तेतेनराज्ञा लब्ध अथ च मार्गणानां वातानां मरिवत्ते लक्ष्यस्य वेध्यस्य प्राप्तिरभ
वत्। तस्मात्तौ पदे शतते न राज्ञा प्राप्तां यकारहीनौ विलक्षशब्दौ वेध्यवाची। लक्ष्यं लक्ष्यं। शरव्यं चेत्यमरः तेनरा

ज्ञा अखिलस्योपरिक्ष्मा पृथ्वी मुक्ता अखिलैरमांगैमस्तसाकेः पृथ्वी व्रतीष्टग्रहीता पार्थिवशस्त्रात्तां त्यागात्॥
पृथिवीत्यागो त्रे विज्ञेयं। अथ चराज्ञाक्ष्मायाः क्षातेस्यागा ४ त्रूर्तां मस्तकानितूना तितरसैस्त ह्वरत्री ब्राहेतिमावः॥
यद्वातेनक्षातिस्यक्ताः शत्रुभिर्मस्तके गृहीतेतिचित्रं। क्षांतेनास्त्रगुरुत्वान्मस्तके न गृहीतास्यायुक्तत्वादिति। द्विषि
सैन्ये शत्रुवर्गे पंचत्वं पंचसंख्याकत्वं स्थितं पंचशत्रुवः स्थित इत्यर्थः। त्वपतिर्न संख्यांतरमापं प्राप्तवान् यत्र
संख्या कापि भवतिव्यवस्थिता। तत्संख्यांतरं लभेत। संख्यानुद्देखिस्यैव्यए वेति नान्यत्र गतेति भावः। पक्षे शत्रु
से। न्यं पंचत्वमरत्तां स्थित्वपतिः संख्यांतरं संग्रामांतरत प्रायाए कसंग्रामे तोवसकत्तशत्रुवधं चकारेत्यर्थः॥

वास टी
६०
60

इह श्लोकसर्वत्रान्योन्यार्थाभिधायित्वं नास्तीति व्यस्ताधिकरणानामायमलंकारः तदुक्तं काव्यालंकारे अन्योन्या
र्थाभिधायित्वमत्र श्लोके न विद्यते। व्यस्ताधिकरणाख्यानमलंकारविदो विदुरिति। हबोद्वषभोधर्मश्चउस्स
र्गस्त्यागः कन्याकुमारी तस्यास्तुलादिरोहः परीक्षणार्थं तुलारोपणं तत्र कन्याया वाच्यता नास्तीति भावः उन्यत्र
कन्या तुले राशी शूलेन त्रिशूलेन व्याघातो मारणं पक्षे शूलव्याघातौ योगौ। दानं हस्ति मदनस्त्यागश्च। दक्षिणावा
मकरेण वामदक्षिणा हस्तपादच्छेदः करणमिति क्रूरहिंसा यात्सुदूयद्वा दक्षिणावामौ सरलासरलौ देशो
चासरः कांडोदध्यग्रभावश्च। सरतीति सरइति सरशब्दस्य दत्यादित्वप्रमाणं। शृंखलाबंधोतस्थितवर्णानामा

राम
६०

दिप्रदेशादावर्त्तनं निगलश्चावर्त्ताएव वर्त्तीकः स्वास्थिकः कनु। तस्य ग्रथनं योजनं उत्प्रेक्षाक्षेपो। अलंकारविशेषौ अन्य
थास्तितवस्तुनोऽन्यथा कल्पनेमुत्प्रेक्षा प्रतिषेधोक्तिराक्षेपः अत्र पक्षे वशब्दो ध्याहार्यः अन्यथाद्विवचवक्लीबेस्यातं
पक्षे उत्प्रेक्षानवध्यानं तेनाक्षेपो भर्त्सनं उत्प्रेक्षानवधाने पिकाव्यालंकरणोतिविश्वः। भर्त्सनं तत्प्रकारगीरित्यमरः
लक्ष्यदानं वे ध्यत्वं उत्तं लक्षसंख्यावाचिकिन्न त्यागश्चच्युतित्यागः क्तिप्रत्ययविशेषः स च कर्तृभावाद्यर्थभेदादनेक इति ब
हुवचनं। कोषः कुंडलमंतर्हितं च वृषो सर्गादारभ्यैतत्सर्वं तं सावधारणमित्येवकारः। सर्वत्राध्याहार्यः। जातिर्जन्म माल
ती च। दोहद दानात्तु सदा मालती पुष्पारिता। शृंगारः करिमंडनं रसश्चरसो नाघ चे शृंगारः करिमंडनएव चेति विश्वः। दुर्व
र्णः कुत्सितवर्णो रूप्यं च। दुर्वर्णोरजतं रूप्यमित्यमरः। गांधारो रागः सिंदूरं च। गांधारं रक्तचूर्णं च सिंदूरं रक्तवालुकमिति हारा

वास टी
६१
61

वली। स्वर्मीयोरुषंपरंवरा शुद्धिर्वी वस्त्रभेदश्च स्वर्मिः परंवरा शुद्धो वस्त्रभेदे पिपोरुषेड्इति धरणिः। अंबरं वस्त्रमाकाशं च
चेलं वलं रागो मात्सर्यादिरनुरागश्च वृषः शुक्रं धर्मश्च। तथोचोत्पलिनी। श्रेष्ठारवु धर्मशुक्रेषु स्कन्नौसौ वृषमेहृष
इति भंगुरत्वं कुटिलत्वं रागविकृतिः स्वपरिपाटिः। प्रकृतिरमात्यः अनंगता कामता ऽशरीरता च मारः। कामो हि सा
च। आगमनमागमः हिजाघातो दतक्षतं ब्राह्मणतामाररतां च। रशना कांची जिह्वा च उभयत्र तालव्यमध्योपरं शना
कांचिजिह्वयोरित्यनेकार्थपाठात्। कांच्यां तु तालव्यमध्यत्वे अनीरशनैः शनैरिति किरातयमकितं प्रमाणं। अरो
रसश्चेति युविरशादेशे वोत्ता दोव्युत्यादित्वं च प्रमाणं। केचित्तु रसनशब्दं नंपारवत कूजितादि आबंधो व्यवहारः प
क्षे रसना जिह्वा मध्यदत्योय मिहपक्षे जिह्वायां पुनरक्ता विहृद्धि ई त्यमध्येवेति गदसिंहकृतशकारभेदपाठात्।

राम
६१

रसैयतनेनतिरसनमितिव्युसत्तेश्चेकाद्भः॥अथरंधमेरागोनुरागोधरलोहित्यचाधररागःकर्ती
ल्वेदनसुत्रोत्पादश्चकर्तनंचद्वयोःछेदनारीणांमूत्रतिर्मिताविवितिविसर्वःनिस्त्रिंशत्वंक्रुरत्वंखड्गत्वंचा
निःकृपत्ववातथाचोत्तरतत्रनिःकरुणातुनिःस्त्रिंशःक्रुरेखड्गेपिवेष्यतइतिकरवालःखड्गःतेनना
शोमरणं॥पक्षेकरोहस्तःवालःकेशःतयोर्नाशः॥महिषीकृताभिषेकाराजवधुः॥आलिःसखी॥आ
लिःभ्रमरश्च॥शोभनंकुमारःकार्तिकेयोयस्याःसातथा॥पक्षेसुकुमाराम्भवीसर्वतिःपुरप्रधानमि
तियुक्तःपाठः॥प्रधानशब्दस्यनपुंसकलिंगत्वात्॥यद्वाप्रधानमितिभावप्रधानोनिर्देशः॥तथा

वासटी
६२
८२

चसर्वतिः पुरेप्रधानप्राधान्ययस्याः॥ स्रातथेतिव्युसन्नि॥ यद्वा॥ युचिप्रधानेतिसाधुः प्रधानंप्रकृ
तौक्लेबमेकत्वेतुन्तमेपुमानितिमेदिनीकरः॥ तयोः शृंगारशेखरातेगवयोः॥ मध्यमावस्थायाः॥
उपांतंसमीपं॥ अत्रैवहेतुः॥ दैवेतिविलोमनीयंअभिलषनीयं॥ पुलोमजाशचीद्राणीत्यमरः॥ स
हनेत्रइंद्रः॥ पक्षेआनंदितमिसुंदरतयासहस्राणांनेत्रं[illegible]ययासा॥ दोर्दृषाभुजाभुजइत्यमरः
गोत्रवंशः पर्वतश्च॥ परिशा॥ मद्गुत्कर्षः॥ एकदेत्यादिवसंतकालएकदापुनराजगामेतिसंबंधः
कषायकंठः॥ सुरभिःकंठः शोभनस्वरोवा॥ ३ द्वेवमरागेसुरभौरसेवर्णेकिषायवागितिवि

राम
६२
१

खः॥सुरभिस्यान्मनोक्षेपीतिरत्नकोशः॥खरेकंठः॥प्रकीतितइतिच॥कलकंठःकुंकुमुखइत्यमर
कुहरितंरुतंध्वनौकुहरितंमतमितिहारावली॥भरितपुतंरितंभरणांपरःससंजातोस्येतितार
कादित्वादिल्नु॥अन्यथाभृतइतिस्मादिसावधेयं॥अब्रादिक[illegible]द्बेरवं[illegible]डनस्त्रियामित्सम
रः॥भृतांवकणाःशीकरस्तस्यकणाःसूक्ष्मभागाःअतानपोनरक्तंकोटिरंग्रंसमालब्धःकृत
समालंभनः॥समीरागएवबाणाइतिरूपकं॥गंडूषसीधुमुखपुरणामद्यंतनुबकुलदोदंतथा
चवृक्षाचवृक्षायुर्वेदनारीमुखासवासेकाक्रीडत्यपिहिकेशरइतियद्यपिगंडूषामुखपुतैस्या

वासरी
६३
63

ऽङ्गुषाप्रसृतौ मम ते ते त्रिषु त्रिलिंग एव गंडुषाशब्दे स्तथापीह पुल्लिंगो व्यस्कारांतश्च पंडितः तः तत्र प्रमा
णां गंडुषोपि च गं[illegible]डुषा कुल्पहे मितद्रवड्सते कार्थपाठः॥ गंडुषमुस्मितवतायय सः सरोषं॥ गजाव
गंडुजलंक रेणुरित्यादिकं च॥ विकटंड्शो मनं॥ चटुलं चपलं॥ केकेल्लिरशोकः अत्र पादप्रहारो दो
हदं॥ तदुक्तं यमुसलं कोः पृथिव्याः मंडलं च॥ वास्तोविको वाडिका पालः॥ करेडुरी इति ख्यातः॥ सुखा
शा सुखतल्पा पते सुखाशो राराजमिति षः॥ सो हांस इति प्रसिद्धः॥ सुखा हेतव आशा येन स तथा च
तुहिनं हिमं अव्ययसमुदायश्च [illegible]स चेकागे वाकुल्पेन न तविध्यते॥ दोषा रात्रिः॥ अनुबंधो दैर्घ्यं

राम
६३

अन्यत्र गुणप्रतिपक्षो दोषः राजीवं पद्मं उत्पलं नीलोत्पलं॥ शालः सर्जपुष्पं अत्र गोवषत्यायाउत्पल
ज्ञा ब्रूते कुवलयं मुच्यते॥ शालस्य पुष्पमित्यर्थे पुष्पमूलफलेषु बहुलमिति विकारागोलुक्॥ प
क्षे राजीवो मत्स्यभेदः॥ उत्पलो मत्स्यभेद एव॥ राजीवा रक्ताम्बु गे मत्स्ये पद्मे राक्षोपजीविनी
ति विश्वः॥ तालव्यान्तु पक्षाबयोः शालो वृक्षो वृत्तौ द्रुमभेदपीतिशब्दाणविः॥ कासारः सरसी सरइ
त्यमरः॥ मरुवकः पुष्पभेदः मरुदेशावकश्च॥ इंद्राणी सिंधुवारपुष्पं तेन रुचितो दीप्तः॥ पक्षे स
च्चा रुचितो ढमिलवित इंद्राणी करणो स्त्रीणां पोलासी सिंधुवारयोरिति विश्वः॥ दमनकपुष्प

वास टी
६४
64

भेदः॥ तच्च शीतकाले भवती॥ पक्षे दमयतीति दमनकः॥ दान्तः मरुवकं पुष्पभेदः॥ उत्फुल[redacted]अत्रा आ"

अ "म्लानो ऽम्लिसिसिका भेदव वा च्यावन्ति मले मत इति विग्रहः॥ मधुर्वसंतो मंद्यं च विक्रीयत इति कर्मि

णि प्रयोगः॥ ततु कर्मकर्तरि तत्र यकः॥ प्रतिषेधा त्॥ यद्वाहकात्यायनः॥ यक विणः प्रतिंधोन

गंधि श्रीकृत्रामा त्सेन पदाकर्मकानामुपसंरभ्मानमिति॥ एवं चैविकारहेतौ सति विक्रियं तइ

ति प्रमादा वेति केचित्॥ कात्यायनवनस्य प्रायि कृत्वा उत्र यसा मंजस्यामित्यपवरे अतिमुक्तः

पुष्पभेदः अत्यर्थेन मुक्तश्च मुनि वृं" भेदो यतिश्च॥ मुनिर्यती मुदी बुद्धियिया लाम रूप किंशुक

म्लान ष्वा सौ सु भ ग नवः १

व

राम ६४

३

इतिविश्वः ॥ विकाशः प्रकाशः । यमुत्वंलंकोः पृथिव्याः मंडलं च ॥ वास्तविको वाटिकापालः ॥ कुरे
ष्टी इतिख्यातः ॥ सुखाशा सुखतृष्णा हर्षश्च शारागां पत्ररचनापत्रम् ॥ परिकीर्तितेति हारावली
स्मृता विचर्चिका लोमल्ली प्रभेदमदनेपि चेति विश्वः ॥ पावकमलक्तकं पल्लवितं सजातवाङ्ल्लवं य
त्रेति ॥ पल्लवनं पल्लवः सजातोत्रेति तारकादिभ्वादितचुप्रत्ययइति व्युत्पत्तिः ॥ तरररराजेत्यत्र रो
रीति रेफलोपे द्रलोपे पूर्वस्य । त्यादिना दीर्घत्वं मीरः कर्बुरः कंकेल्लिरशोकः निर्वाणो निस्तेजी
कृतः पलाचः ॥ पचेर इति ख्यातः पलावलीनुवलिशांग्रा हकुमहस्यं बंधन ॥ कंदर्पेत्यादि ॥ एताद

वासदी
६५
65

शो मलयानिलो दक्षिणावाते ताववावितिसंबंधः॥ ववौ वहति स्मलं परो लुब्धे रलाटीलाटदेशस्त्री
धम्मिल्लः संयतकेशः मलनमाकुलीकरणं॥ कणिटी सुरतबंधाः क्वचित् रणारणाकरसिकेति
पाठः तत्र रणारणा कामदनः॥ कुंतली कुंतलदेशीया कुंतलः केशाः केरली केरलदेशीया पालिः प्र
देशः संवाहनं मर्दनं॥ आंध्री आंध्रदेशीया नीरंध्रः निबिडः॥ निदाघो घर्मः संहतिं समाजं॥ तत
इत्यादि वासवदत्तामंचं आरुरोह सन्वयः गुमा गुमापितमव्यक्तशब्दं व्यचिक्रपं॥ घट समुहं
दीधितिभिर्धवलिमांशुकत्वमित्यत्र तृतीयेति योगविभागात् समासः॥ ननु षष्ठीसमासस्तत्र राम
६५

पुरस्ता गुरुणेति निषेधात् नंदिरानंदः जामातृ स्नुहृ ह्मात दुक्तमुत्तरतंत्रे ॥ नंदिरानंदः जामातृ मित्रयो
रपि चेष्यत इति घोषः शब्दः ॥ पक्षात् नंदिघोषोऽर्जुनरथः ॥ तदुक्तं गांडीवं धनुरेतस्य हनुमान्
ध्वजमुख्याणां ॥ नंदिघोषो रथाश्वस्य गतिस्तस्य नभूतल इति ॥ यत्र मचेस्थिता राजपुत्रा इति
संबधः ॥ अत्र बभूव रित्यधाहार्यं कलांकुरो मुलदेवः कर्णी सुतो मलदेवा मुलभद्रः कला
२१ कुर इति हावली ॥ नगरमंडनता काचिद्वेश्या सा तेन कामकला कौशलेन विजितेति वार्ता ॥ प
क्षेन नगरस्य मंडनमलंकरणं ॥ दिव्यक्षुः सुगंधितदुक्तमुत्तरतंत्रे दिव्यचक्षुः स्फुरद्गंधे महा

वास टी

६६ कृष्णः

66

गंधं सुगंधिका मति॥ कृष्ण गरुः तयोर्यः परिमलः तदः ल्विताः दिव्य चक्षुः सिंह क इति व प

क्षे दिव्य चक्षुः कृष्णा द्रौपदी गुरु युधिष्ठिरः एभिः परिमलिताः संबंधाः॥ यद्वा॥ दिव्याद चक्षुरं

तीतानागतज्ञः सहदेवः कृष्णा द्रौपदी गुरु युधिष्ठिरः एभिः परिम [redacted] लिताः पतिपालिताः॥ य

द्वा दिव्य चक्षुरं धो धृतराष्ट्रः कृष्णा द्रौपदी विता पांचाल स्ताभ्यां परिमलिताः [redacted] सं बंधं नीताः॥

दिव्य चक्षुर्द्वयं प्रोक्तं मं धो यश्च सुलोचना इत्युत्तरतंत्रा॥ दिग चक्षु सुत नये कृष्णो धे सिंहके पि चे

ति धरणि काविद्धः परिमलं गंधे संबंधे रक्षणेपि चेति विश्वः॥ सुहरम त्सर्धवृद्धा वृद्धिं गता राम

६६

५

सुखाशा सुखप्रत्याशा येषां ते॥ पक्षे सुहृद्बद्धा मतियुक्ताः सुखाश्याः सोहा स इति ख्यातफला
नि येषु ते॥ शोभना अबला नारी स्वबला सुसैन्यं च॥ शाकुनमस्त्येक अयं तः॥ पक्षे शकुनः पक्षी शु
भाशंसिनिमित्ते च खगे च शकुनं विदुरिति विश्वः॥ ततः पक्षि॥ पक्षे श्रावको [illegible] त्ता तारः अभिभावअ
३ नेकार्थाभिधानवद् इति वचनात्॥ रूपं सौंदर्यं पॅश्च॥ रूपं स्वभावे सौंदर्ये नानके पशुशब्दयोरिति
विश्वः॥ अनुसारः अनुसंधानमनुसरणं च॥ जैमिनीमतं मीमांसा॥ तथा तेन प्रकारेण अकंन्या
कवरणात्मकेनागतानुपस्थितानुध्वंसित्रतः॥ नमस्यमानाः॥ यद्वा॥ तथा तेन प्रकारेण यत्

स्वीयमागतमागनंततर्ध्वंसिनः कार्यसिद्धेरदर्शनात्॥ पश्चात्तथागतोबुद्धः सर्वज्ञः सुगतोबु
द्धोधर्मराजस्तथागतइत्यमरः॥ सं च सूत्रमधीतेक्षिवातदधीतेतद्वेदेत्यण्॥ सांवत्सरोज्याति
षकः॥ तेषुयत्फलंलाभस्तत्रैकथकाः ममषेनवासवदत्तालाभोभवतीतमुपायंवितयेतिबु
वंतिस्मेत्याशयः॥ यद्वासांवत्सरायफलंपुगादिफलंदर्शयितुंशीलंयेषामितिस्वेष्टला
भहानायजनैस्तथाक्रियतएव॥ पक्षेखंजरीटः वर्षभाविशुभाशुभफलसूचकोभव
तितदुक्तंमलोपुगोपुराज्यप्रदइत्यापिकार्तस्वरइषदार्तस्वरः॥ यद्वाकीर्त्तेरयंकार्तस्वचा

सोऽश्वरश्चेति बहुलाः तत्कीर्तनिमत्यर्थं कुर्वाणाः इत्यर्थः कीर्तशब्दं कृत्वा इतिवार्थः ॥ यद्वा ॥ कर्तस्व ५
रंहिरण्यं तन्मयाश्चस्त्रकृतयः स्वर्णालिकारिणः ॥ पक्षे हिरण्यं विकाराः ॥ भास्वतो दीप्तस्य
जलनस्य यद्दर्शनं तेन निमीलिताः संकुताः पक्षे भास्वनादित्यः विश्वेषां रूपं सौंदर्यं विदद्व
लोकनजनितालीकप्रत्ययाः ॥ पक्षे विश्वरूपो विश्वंभरः कृष्णः अत्र दुर्योधनादिभिः श्रांतैः
कृष्णस्य बंधनमुपक्रांतमनो भागवतो विश्वरूपदर्शितं तदपि तैरलीकमेव ज्ञातमिति
पुराणं ॥ अक्षमिंद्रियं हृदयं मनः तयोरज्ञानेनानवधानेन हृताक्षमाश्रोतिर्येषां ते तथा

वासवदत्ताहृठझीरज्ञाहृतानेनत्वांतिश्रुत्वाइत्यर्थः॥पक्षेअक्षहृदयंपाशाकतत्वंतद्दत्तानेन
हृताक्षमामूमित्येषांतेनथा॥आत्मनिस्वस्मिंन्नुरारणाबुध्याहस्तिमत्यावलवंतोपिमसु
वाहाःशोभनयोटकाइतिविरोधः॥अथचनिजमिराकरणाबुध्यासुवाहाः॥सुखग्रा
ह्याःसुभुजावावाहोबाहुतुरंगयोरितिशास्वताइत्यविरोधः॥पाणिग्रहणंविवाहोहस्त
ग्रहणंच॥असुकरंकर्षः॥अशोभनहस्तश्वसुकरमितिसमृद्धौअव्ययीभावः॥मंचस्याधोव
स्थिताअधरीकृताःयद्वाअधरीकृताहीनतामापादिताःस्थिराधैर्यशालिनः॥पक्षेधरापृथ्वी

धरः पर्वतो वा तदभावो धारा तत्कृताः ॥ अपि स्थिराः अजंगमाः ॥ दबृहती महती या कथा तदनुबं
धिनः तत्कारिणः गुणाढ्याः सर्वगुणसंपूर्णाः ॥ पक्षे बृहत्कथा बड्डाहत्कथा गुणाढ्यां नामकविः त
दुक्तमुत्तरतं चेभ्युत भाषाकृद्विवुधो गुणाढ्यश्चापि कीर्तित इति तेन ॥ किल भागवते ॥ मैनीपते वा
मुखकमलादुपश्रुत्य बृहत्कथा यानि बद्धैतिवाता तिर्यग्गतयः कुटिलगामिनः सुगंधवाहाः शो
भनगंधधारिणः ॥ पक्षे शोभनगंधवाहो वायुः ॥ स च तिर्यग्गतिः वायोस्तिर्यग्गमनमिति वैशे
षिकभाष्यं ॥ यद्वा तिर्यक् तिर्यग्याति हरिणस्तेन गतिर्येषां तेन तथा ॥ द्रोणाः काकाः तस्मिन्नुप्र

स्पाशा द[redacted]र्शिताः अस्माभिः शुभसूचकः काकध्वनिरश्रावीत्यावेदयंत इत्यर्थः ॥ पक्षे द्रोणा
श्वस्थामपिताऽत्रयाआशातस्कृथकाः द्रोणोनममस्यैत्येजेतव्यमवश्यमेवेतिवदंतइत्यर्थः
द्रोणकाकस्तुकाकोलइत्यमरः ॥ द्रोणः काकांतराचार्ययोरित्यमरः ॥ सुरः सुभटआदित्यश्च
भासः शोभादीप्तयश्च ॥ सुर्यवाचकः शुरशब्दस्तालव्यादिरित्यादिश्च ॥ तदुक्तमतसिंहोष्मभे
देतालव्यादिः ॥ सुभटेश्शूरः सूर्येचदंत्योपि ॥ तथाभूरंत्वाग्रहदूषिते ॥ तथातत्स्वय्यनारंभएवशु
रमंडलमादिमानमकरोदितिचंद्रप्रयोगः तालव्यादितायामेतानिप्रमाणा[redacted]निदंत्यादिता

यांतु सौरभा सौरभास्यदमिनियमकितमेकं अनन्यच्च असुधागाद्भिभ्यः क्त्वि स्त्योग्णादिकः षु
ङ्धातोः कृसत्ययोसाविति साधुताप्रकारः॥ सुभटवाचकस्सुभुरशब्द स्तालव्यादिरेव॥ त
स्पदं त्वादित्वे प्रमाणाभावादि त्यवधेयं॥ कर्णीरथात् प्रवहणात् तत्क्रीडारथादिति पाठः॥ तत्र
कर्णीवं ज्ञात्वमं चात्वकर्णीवंज्ञो भवेत्त्वं च इति हारावली॥ पाठस्त्वयं हे[illegible]ः पूर्वं संचारोहणस्य चः
त्कृत्वा तत्क्रीडारथारोहणस्यानुरक्तत्वादिति॥ अर्थेति॥ तस्यामेव रात्रौ स्वप्ने युवान साद
दर्शीति संबंधः॥ वाली वानरराजः॥ अंगदं कं कर्णां वालिपुत्रश्च॥ कुहूमुखः कोकिलः पर

पुष्टः कुङ्कुमुखइतिविध्यवासीहारीहारयुक्तामनोहरश्चकंठोग्रीवास्वरश्चस्वरेकंठः प्रकी
र्तितइतिरत्नकोशः॥कनकमृगमारीचमुत्थितरं॥रामोदाशरथिः॥रामास्त्रीजयंतइंद्रपुत्रः
वृद्धश्रवाइंद्रःवृद्धानांश्रवःकर्मश्लाकंपुरुषस्यहर्षसानंदनकुर्वाणमपितुसर्वमेव॥पक्षे
कंसोसुरभेदःकरकोरुस्यः॥वर्षोपलश्चशोषाद्विभाषेतिकपुवर्षोपलस्तुकरकेत्यमरः॥
सुरभिःवसंतः॥आदिबीजमादिकारणंास्यह्रीग्रहं अन्योन्यस्पर्धयात्तवसतइत्यर्थः॥वि
लोभनायहितप्राकृक्रीडाष्ठइतिष्ठः॥यद्वाविलोभयतीत्यर्थेबाहुलकात्कर्तर्यनीयत्

विलोमनाकृतिमितिपाठेनत्यादित्यस्युः ॥ विलोमनाकृतिर्यस्येतिविग्रहः ॥ इदानींकामा
वस्थां सूचयति ॥ अनंतरमि[illegible]ति ॥ वासवदत्तासखी ॰ अनेनसमं मुमुक्षेति संबंधः ॥ का
मवस्था च दशविधा भवति ॥ यदाह भरतः ॥ प्रथमे त्वभिलाषः स्याद्द्वितीये चिंतनं भवेत् ॥ अनु
स्मृतिः प्रोक्ता चतुर्थे गुणकीर्तनं ॥ उद्वेगः पंचमे प्रोक्तो विलापः षष्ठ उच्यते ॥ उन्मादः स
प्तमे प्रोक्तो भवेद्व्याधिस्तथाष्टमे ॥ नवमे जडता प्रोक्ता दशमे मरणं भवेत् ॥ अन्योन्यापाहाश्च
क्षुः प्रीतिर्मनःसंगः संकल्पोत्पत्तिरेव च निद्राच्छेदस्तनुता विषयेभ्यो निवर्तनं लज्जायान

वास टी
७१

शाउन्मादो मुर्छा मरणमेव चेति एताश्चव्यतिक्रमणा ॥ दुःसथं तेयदाह स एव ॥ प्रवृत्याविनिव
र्तितेवस्थाः कामस्य सुचिकाः ॥ अतएव वियोगेपि कामिनाचिरजीवितेति ॥ तत्र चतुर्थीम
वस्थागुणकीर्तनेनाह अहो प्रजापतेरित्यादि गुणकीर्तनमिति मन्यउत्प्रेक्षा ॥ तेपुंगण्यस्यकु
तिकौशलं च स्याः ॥ कमलभुवा ब्रह्मणा ॥ समवायी संबंधः ॥ वैषसं दुःखं ॥ नलोपाख्यानं प्रसि
द्धमेव ॥ इदं दमती भोजराजसुता ॥ महिषी महादेवी महिषस्त्री च अजो राजभेदः ॥ छागश्च ॥ च
मेमिलषितवती ॥ दुर्वाससः ॥ शापं शाकुंतलानुबभूवेति पुराणकचितु ॥ तन्न ॥ कालिदासप्र

राम
७१

णीतमेप्राप्तेतकविनाप्रणीतमिवियतःसकुंतलाशापकथायाःपुराणेषुचादर्शनात्‌रंभाकदली॥क
दलीवारंभा॥बुधारंभेत्यमरः॥अचीकमत॥आकांक्षितवती॥शुभेगणियममहादेवीवुमेगणिया॥
धर्मराजोबभूवइतिपुराणंगंधर्वसहस्राधिपतिषष्ठीवातादरेइतिचकारात्॥सस्नमीआँचकांक्षत्‌आक
कांक्षितवती॥विरहमुर्मुरेत्यादिनामन्यमानेत्यंतेनानुस्मृति॥तृतीयामवस्थामाहयदाहंविषयग्र
हणानिवारितनिशेषेंद्रियविशेषनिःपला॥तदनुस्मृतिमात्रस्थितिरत्रचसाकामिनीमवर्तिययागम
नसज्ञानंपायंपायंसवीवचनशृति॥नखलुकुरतेसेवाकालेगुरोरपिसंभ्रमंसकलविषयव्यावृ

वास. टी.

७२

72

तात्काचनश्च्छसितोऽमास्मरतिसततंचैकंकांतंस्मरज्वरपायिनी॥अथवाविरहेत्यादिनाश्रु
न्यकरणग्रामेत्यंते॥नष्टम्यावस्थाव्याधिरुक्तः॥परेणत्वनुस्मृतिः॥यदुक्तंमनःसंमोहसर्वांगदा
हधृत्यादिभिस्तथा॥शरसावेदनाभिश्च्याधेर्भवतिसंभवइति॥मुमुरोग्निअग्निचूर्णिस्तुषाग्नि
वीमुर्मुरस्तुषवह्नौस्याद्द्रविवाजनिमन्थइतिविश्वः॥कालःप्रलयस्तत्राग्निरूपोदाहकालाधो
रुद्रस्तस्याग्निस्तृतीयनेत्रस्यतेनग्रस्तेव॥करणग्राममिंद्रियपाठवंइंद्रियसमूहोवातथाचाव्या
डिःग्रामःसंवसथेहेयावृंदेशब्दादिपूर्वकः॥तथायंकरणादंतेपाठवेचापिदृश्यतइति॥उकीर्णि राम

७२

मुखादितं॥ प्रलुप्तं खचितं॥ कीलितं दृढीकृसंनिहितं निगडितं बद्धं वलितं वर्तुलीकृतं परीतं वेष्टि
तं अंतरात्मानमधिष्ठितं अंतरात्मनिस्थितं अधिश्रीउ स्थास्थं॥ कमलस्याधारे द्वितीया॥ पललं मांसं
संविभक्तमिश्रितं॥ उन्मत्ते वेत्यादिना प्रकृतजीवस्य तेन जड़ता तव मीमवस्था माहग्रहः॥ तरंगआ
धिकंवं॥ परिगता प्रविष्टा रागानुराग एव रज्जुः संतुः तैरपरिंता व्याकुलीकृता कीलिता कलिता भाव
नाचिंततं॥ खिल्लिता दृढं निखाता॥ प्रियसखीत्यादिना बाष्पबिंदुनिस्यंते न पुनरष्टमावस्था सुचि
ता॥ वितरदेहि मुग्धेत्या मुग्धे मनोहरे वासरमे दक्षिणा उदारे वा संवृणु बंधय॥ तरलो चं चले तरल

वारि

वास. टी.
७२
73

ज्ञायेवावा मे मनो हरेर्वासरस्मेदक्षि गृह शीले वा वीजयेति विपुर्वीरिजगतीक्षेपणाया रित्यस्य प्र
योगः॥ आविनिअभिप्रायते स्य गय आवृणु बाष्पबिंदुनिति बहु वचनेन पीडादिरुदितमुक्तं त
थाच भरतः॥ बाष्पा नामाश्रुणः पूर्वमसौ संजायते त्रिधा निमित्तत्रयसंधादानंदव्याति संभवः
आनंदे विलुठन्नूमवतीर्ष्या यां सतरंगिता यासः॥ आर्त्तविजस्त्रविकल बद्धबदलबिंदुसंदर्भ इति।
एहि निद्रे इति दृष्ट्वा वपुनस्तत्र तद्दर्शनसंभव इति षष्ठावस्था विलापः॥ तत्र इहास्थित इहासी
न इह चापगतो मया॥ इति ते स्तैर्विलपितैर्विलापं तु प्रयोजयेदिति॥ धिगिंद्रियैरित्यनेनैंद्रियकुस

राम
७२

तेषां स्वविषयग्रहणासंभवात्॥ अत्र धिग्पुतानीन्द्रियाणि धिगिन्द्रियाणि तत्र स्तुतीया अन्यथा धिग्योगे
द्वितीयास्यात्॥ [illegible] यद्वा उन्मसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृ
श्यते इत्यत्रापि शब्दः व्यभिचारार्थं तेन धिग्योगे द्वितीयाविधेरनित्यत्वमि[illegible]ति॥ यद्वा॥ कर्तव्यमित्यध्या
हारात्तृतीया॥ धिगित्यादिना चोद्वेगं पंचमीमवस्थामाह॥ भाववर्तिकामकलाभिसंज्ञाभिप्राये
क्षेवा॥ अपगता इतिवर्तमानेक्तः॥ मुमुक्षेत्यनेन नवमीमवस्थां जडतामाह॥ अनंतरमिति॥ एतेषु स्या
तेषु एतादृशी व्यतिष्ठतेति संबंधः॥ क्षणमतिशिशिरेत्यादिना विरहाग्निदह्यमानामित्यंतेन पंचमी

त

मवस्थामुद्वेगं पुनराह॥ घनसारः॥ कर्पुरश्चंदनं वालिम्रगा नदीपरिवारितं॥ पूर्णां सस्तरं शय्याकं
लापवन्नीव्र मित्यन्वयः॥ अत्रापुक्तिरलंकारः विप्राणां रवः शालिनामिति शेषः॥ कुशानातपरि
नइतिवचनात्॥ प्रचलदित्यादिनापरिष्कृतानीपर्यंतेन चतर्थीमवस्थां गुणकीर्त्तनरूपां पुनरा
ह॥ छुरितं संबंधं स्मृतिवेदः॥ कृत्तिश्चप्रत्ययिप्रश्नपवत्॥ आभोगउपचयः॥ लक्ष्मीरित्यत्र सति
विशेषः एवमंतात्रा विभक्तिविपरिणाम मनतच्छब्दाध्याहारः॥ द्विजाः दंताः अदृष्टचरं पूर्वमदृ
ष्टं॥ अतिशयामना॥ मतिशयेन जयत्॥ जनपदेवशः कृतभांजि सुकृतयुवानि॥ परिभावयंतीचिं
सु

नयंती॥ दिक्षु इत्यादिना तृतीयावस्थानुस्मृतिरुक्ता व्यतिष्ठते यत्र समवच्च विभ्रमः स्यइति तत्र विलोकयं
तीति अननुभूतमपि संकल्पेनावलोकयते॥ कामक्रोधभयोन्माद चौर सर्पाद्युपद्रवाः॥ अक्षतान्य
पि पश्यंति पुरतोवस्थितानि चेति॥ अथ तस्या इत्यनेन निसृष्टार्थात् साहनीकृयितार सर्वेदिनेतीक
श्चित्तु पत्रहारिणीयं दूतीत्याह तल्लक्षणं तु तत्रैव॥ कामित्याः कामितश्चापि संदेशार्थीं तु पत्रिका॥ प्राप्य
त्याचिरेणैनामाहुः॥ पत्रस्य हारिकामिति॥ संदेशस्यास्य स्यक्षद भावेयतेनाग्रस्फुटीभविष्यति॥ उपा
नयतु द्वदोसकं दर्पके तुः॥ आर्यमाह॥ प्रसक्षेत्यादि दृष्टोभावो न कुत विशेषो यया नायकस्य सर्थात्

हियतः अल्पक्षमपिप्रियस्यभावंदृष्ट्वामय्यनुरक्तइतिबुद्धिरुपपद्यतेकिंपुनःस्वल्पभावमाकलय्यअ
तस्वंस्वल्पेदृष्ट्वाभावोपिद्रुतीप्रेषणोनप्रतिपथस्यइतिस्फुटाः द्रुतुपतिदृष्टीकरोति॥अत्रास्थिरहृदयात्व
मेवहेतुः॥एतेनान्यत्यनापिकास्वभावमुक्तातमालिकानिवेद्यमानस्वप्रांतरोद्भुतविरहातिशयं
प्रतिपादयंतीस्वानुरागस्थैर्यमेवप्रकाशयंती॥अथेत्यादिना॥अत्रांतरेस्मिन्नवसरेमरीचिमालीर
विःमध्यमंलोकंमर्त्यंपृथिव्याअस्ताचलप्रांतेपतितत्वात्॥अथभगवान्ममज्ञेत्यन्वयः॥वासर
रूपायःताम्रचूडःकुक्कुटः॥चक्रवाकस्यचक्रंसमुहःतत्रसंक्रमितसंतापआदित्यरजन्याविरहं

संतापपातितत्वाच्चक्रवाकानामादित्यस्यास्तसमये माघाद्दुसेरक्ष्यते कुंभी हस्ती॥ द्विपावित्स्यूर्यष्टि तिकुंभी सामाजा इति हारावली॥ धूर्जटिः शिवः॥ वधे बंधने बंधु रूपकारकः॥ तत्कारित्वात्तुष्य द्वा बध्नातीति बंधुरिति क्रियाशब्दः बंधस्य बंधुः वध बध्नातीत्यर्थः॥ बंधुरित्यत्र ॐ णादिक उप्रत्य यः भोगः शरीरं जालंकः करिभूषणं॥ तस्य पाशंकाः वितर्कः तस्य सनाभिः सोदरस्तुल्य इतिया वत्॥ मंडलं बिंबं यस्य सतथा॥ संधि॥ अत्र पक्षे दंत्यः सकारः क्वचित् तालंकशं कोशं तालंकतु ल्यं नाभिमंडलं यस्य सतथा॥ संधिनी वृषभाक्रांता गौ गुर्विणीति यावत्॥ तदुक्तं रत्नाकर ते॥ संधि

न्यकालडुग्धा दौर्वृष्पाक्रांता च संधिनीति॥ पावकपटोलन्तः कपटः॥ गुर्विणी गोर्भस्तके लक्षा कप
टोदीयत इति लोकव्यवहारः दितकरकर छिन्नेति सुयीस्त मेवदिव सविनाशा देवं॥ क्रमेणेति॥
संधा समद स्यनेति संबंधः॥ पुर्वेरजं सिलुडितं पश्चाद्दुष्यितं कुल्लार्थिगृहाकांक्षियरस्परक्तै
लहेनव्याकुंलेयत्॥ कलविंककुले चटकसंघः॥ कलविंकः स्मृतो ग्रामचटकेपि कुलिंगके इ
ति विस्वः॥ कल्लविंकश्चित्रपृक्षो गृहतीडोवृषायणा इति रावली च॥ गरडा इति लोके प्रसिद्धः॥ शि
खर मग्रं सर्वत्र सतिसप्तमी वसतिवासस्थनं॥ ध्वांक्षः काकः वासागारो वासगृहं उद्धारः प्र
हा

काशः अचितं छन्नं ॥ दूर्वी चितत टी दुवि चौरति प्रसिद्धा ॥ आलोकिका वदनध्वनिविशेषः ॥ बा
लानां निद्रार्थं क्रियते हूरलोल इति प्रसिद्धा ॥ तदुक्तं आलोकिकाकुकुलकुलिका उललि सुखघं
टिकेति ॥ जरती वृद्धा शिशपिष माता शयितुमिच्छो कंदर्पमुद्रा प्रसाधनं ॥ क्षुद्रा वेश्या क्षुद्रा वेश्या न
यीकंटकारिका सरघा सुचेति विश्वः ॥ शिष्टा वेदप्रमाणा प्रभुगंता जनः स चात्र योग्यतया शुद्धाति
रिक्त एव विवक्षितः ॥ भक्षितस्य पुनरुद्कीर्य चर्वणं रोमंथः ॥ पार इति प्रसिद्धः कुरबकुडुवका ह
रिणा समुहः ॥ श्रदिष्टं मदुतरंगोष्ठीनं पुर्वं गोष्ठं गोष्ठा ता खन्तु तु पूर्वं इति खडू गोष्ठं गोस्थानकं

ततु गोष्ठीनंभूतपूर्वकमित्यमरः॥पृष्ठवत्पृष्ठमूर्धभागः॥द्रोणकाकः॥कलिलोव्यासः॥कुलयोनी
डं॥काप्येयंवातरक्तमेका।पिच्चा।स्यादृटकअत्रेकपिकर्मचवपन्नुचादिनिगर्जिततनिषतिनिर्गतुमिच्छति
कोटरवाडंइतिप्रसिद्धः॥कुटीरंगृहंकुटुंबीगृहस्थःकौशिकपेचकः॥करशाखाअंगुल्यः॥मु
खरितधनुषीति॥समासांतविधेरनित्यत्वात्समाधेयंशेमुखीमुपिबुद्धिचौरे॥आकल्पान्ते
पथ्यां॥शंभलीकुटनी॥तस्याभाषितं॥अयभोरातप्रायः॥कोतइविरूपंतद्धाजितलकरण।शील
यां॥शंभलीकुटिनीसमेत्यमरः॥भुजिष्याप्रेष्यातियोज्यकिंकरप्रेष्यभुजिष्यापरिचारका

इति॥ इह तु तत्र स्याधर्म्याद्राजादिदासीदृष्टव्या॥ यद्वा भुजिष्या स्वतन्त्रा स्त्री॥ भुजिष्या स्वतप्रेष्यमाने स्या
त् स्वतंत्रायामपि स्मृतेति धरणिः॥ परगृहवासिनी स्वतंत्रा शिल्पादिकौशलशालिनी सैरंध्रीत्युच्य
ते॥ तथा सैरंध्री परवेश्मस्था स्ववशा शिल्पकारिकेत्यमरः॥ जल्पाकं वा चालंजनीवधुः॥ जनीसी
मंतिनीवध्वोरस्नैा च जनिर्म[illegible]तेति विश्वः॥ कथ कत्वर यैव चत्वर त्वरा॥ निःकुटो गृहारामः॥ गृहारामा
स्तु निःकुटा इत्यमरः॥ निकुटस्तु गृहोद्याने केदारपटपोरपीति विश्वः॥ बर्हिणो मयुरः॥ कलबर्हीभ्या
बर्हिणो मित्वचु॥ मयुरो बर्हिंत्यमरः॥ अत्यावस्था निर्णयः॥ संकोचे तत समुद्रणोत॥ उदंचत उत्थितं॥ कुशेशायं

कमलअस्मात् कुटीकुटीरं स्यादित्यमरः॥ सर्वत्र चात्र स्वभावाख्यानमलंकारः॥ यथा तानावस्थं पदा
र्थानां रूपं साक्षाद्विवृण्वती स्वभावोक्तिश्च जातिश्चेत्यालंकृतिर्मतेति॥ अथेति संध्या समदृश्यतेति सं
बंधः॥ सर्वपट्टमयैः सर्वपट्टसूत्रविकारैः॥ मणिमुक्तादिः तेषां कुट्टिमालिः क्षोदपरंपरा पदसूत्रं चयो
गात्तया रक्तमभिप्रेतं॥ क्वचित्सप्तपटमयीव सतकुट्टिमालिरिवेति पाठः॥ तत्रैव सतकुट्टिमं पोताच्छा
दनं॥ तथा च हारावली पोताच्छादनमाहुः स्तमरकतमथ वस्त्रकुटीनं कवयः॥ तत्र विमुक्तं वासो निश्च
वणि चेत्सप्तपट्टमयैः सप्तखंडपटविकारैः कमलिनी पद्ममेव अब्धिनीकमलिन्यादि पद्मपद्माक

रपि चेति धरणिः॥ कांचनसेतुरिवेत्युत्प्रेक्षातरूपमा अतएवात्र लिंगभेदो न दोषः॥ पीतांबरो हरिः
पीतमंबरमाकाशं च भिक्षुकी कापालिका॥ तारा नक्षत्रं बुद्धदेवता च॥ रागे तु रागो लोहिसं च रक्तां
बरं लोहितवस्त्रं लोहिताकारं च॥ क्षणो न वतिमिरमजं न तेत्यन्वयः॥ अजं न तेप्रकाशितं॥ क्षणाद
रात्रिरामा लोहित्यं॥ पक्षे क्षणाउत्सवस्तदर्थमतिशयां गश्च॥ संध्या तुल्या सुसंध्याशिष्यासु॥ संध्या
रागं तिरीक्ष्य वेश्या अपि तादृशमेवां गरागं विदधतीति तच्छिष्यात्वं तासामिति केचित्तु॥ तुला[illegible]शि रा
भेदः॥ आधारो येषां ते॥ तुलाधाराश्चंद्रादयो ग्रहास्तेषां कश्चिदस्तमितः कश्चिच्चानुदित इति तत्पू

वास टी

७९ न्त्याद्यैः॥यद्वा तुलाधारस्तुलाराशिः॥तत्कृत्यतातु संध्यायां गमने प्रायिकतयेति तुलाधारस्तुलाराशौ म
वेद्वाणिजके पिचेति विस्वः॥पक्षे॥तुलाधारो द्वादादेवस्तुपरिमाणकारी पुरुषस्तेन शून्यायां पारायवी
79 त थ्यां विक्रेतव्यस्याने राजदानापहरणभिया ततः पलायंत इति भावः घनैर्निविडं घटमानाः मिलिताः
पुटकिनी पद्मिनी॥ नालीकिनी पुटकिनी विसतामिश्रपद्मिनी त्युत्पलिनी॥ पमराणा मतिरयामेवे
नांधकारप्रतिहस्तकता प्रतिहस्तकः पडिहय इति ख्यातः कुररी पक्षिविशेषस्त्री हा पुरिति ख्याता तान
क्षत्रं ताएरका कंठकांडः कंठ सं मः॥ कालिमसता निकृत्त तुल्यं॥ तारका दैत्यभेदो नक्षत्रं च तारका॥ उलु राम

७९

कः पेचके यो धभेदश्च उलूकः कुरुभेदे विपेचके जंभेदिनीति विश्वः ॥ धृष्टद्युम्नो द्रौपदी भ्रत्वा ॥ द्रोणा
श्वत्थामपिता कृपश्च ॥ कौशिकः पेचक इंद्रश्च ॥ कौशिकः पेचके शाक्रे विश्वामित्रे च नंदन इति विश्वः ॥ कृ
त्तवर्त्माग्निः काष्ठादिक का[illegible]दारश्च ॥ अपहारः प्रच्छादनं दाहश्च अत्र लिंगव्यत्ययेनान्वयः ॥ यद्वा कृत्त
वर्त्मा पापस्य वंशः तदपि अखिलस्य समस्तस्य जनस्य काष्ठा उत्कर्षा स्तदपहारक मयनायक मि
त्यवधेय ॥ स्वगर्भे सिसत्वं मधिकमिति यावत् ॥ कर्करः शिलामयः उन्नतभूभागः तमो ज्योतिरिंगणाः
तथा च व्याडिः ध्वांतोन्मेषश्च खद्योत स्तमोमणि र्ज्योतिरिंगणा इति ॥ मासलितपष्टमे च कितं कृष्टीकृ

तं॥पेचकीहस्ती॥पेचकोगजलांगुलमुल्लपर्यंतेषुकूयोरितिविश्वः॥सो स्वा स्तीतिपेचकीविंध्यवा
सीचहस्तीमहामदपद्मीपेचकीपुष्करीकरीति॥भोग भो गः कामिकायः॥यद्वा भोगिभोगः सर्प
कायः॥प्रावारेणांवस्त्रं पांसुला असती॥असत्याः वस्त्रं नीलमेव भवति अभिसारे नीलवस्त्रस्यैव
भरतेन ग्रहणात्॥अतएव तस्यकरगोगीतयोविदेशीलयनीलतिचोलमित्युक्तं मित्रतामालिन्य
नमित्रताचसमयोरेभवति॥तदुक्तं॥संगतिश्चविवादश्चविवाहश्चनराधिप॥समैरेवहिकर्त
व्यंनोत्तमेनाधमैनिपीति॥अपस्मातारजन्यास्तत्कारित्वात्नुबोद्धसिद्धांतयिवेतियद्यपिसमोसि

रामं
८०

दांताविति पुल्लिंग एवस्सिद्धांत शब्दस्य द्यापि लिंगमशिष्टं लोकाश्रयत्वादिति न्यायात्॥ नपुंसकापि।
क्वचित्तु बौद्धदर्शनमिवेति पाठः बौद्धा हि सर्वं शून्यतावादेनाक्षानमयं जगदिति मन्यमानाः॥ प्रत्यक्षप
रिकलितमपि पदार्थजातमन्यथयंति वदंति च सर्पी चंद्रमसौ व्योमतारा च कैवसुंधरा॥ सरितः सा
गराः शैलाश्चिन्तस्यैताविभूतयइति॥ अंधकारप[illegible]क्षप्रत्यक्षं चाक्षुषमती॥ तर्जितं तर्जरतमो स्तीत्यन्व
यः॥ असीत्यध्याहार्यं जर्जरतया पूर्वस्मात् भेदः॥ स्फूरितं दीर्घीकृतं॥ अवटो गर्त्तः। सराव तद्घेवृस्वा
त्॥ अवटः स्यात्॥ खले गर्त्ते कुपे कुहकजीविनीति विश्वः॥ सोटोपं सावष्टंभं॥ अतिशयेन स्फुटापाट

वास टी
८९

वंपदुत्वं॥ ततोत्कूट मुग्रः प्रेरूटः प्रवक्तो विंशांकटो महानूयः कुटझिविटपः तत्रोत्कटं पथास्या देवंवि
नटिता नर्तिता विनिर्गता वा याः पटपदावल्यः तासु साटोपं यद्याजेनात्मना॥ प्रारंभं दर्शयतीत्यर्थः॥ घो
रो भयातकः च्च स्मरो भक्षशी शीलः घस्र अदने सृथस्य दः क्मरतीति क्मरत्र कविद्धोरदिति पाठः॥ तत्र
घुरा श्वे धातुः॥ शतृ प्रत्ययः॥ यद्वा घोरः ता च रति आचारे सर्वप्रातिपदिकेभ्यः क्विरिति क्विप्॥ ततः
क्विवतां द्धातुत्वं ननजहा तीति वचनाद्धातु संज्ञायां सत्यां शतृ प्रत्ययः॥ जर्जरता तुनिशाकरा रभसमय
संजातभीतेरेचेति द्रष्टव्यं तमी रात्रिः क्षपो नतारकाव्यराजतेति संबंधः॥ तांडवं नृत्यं॥ आडंबरः राम
८९

२०

आभोगअतिदवीयोतिमहत्॥गणापतोविचारयतः॥कटिनीखटिकाअजिनेवमीणाआकाशेइतिरूप

कंगुटिकास्त्रंगुरिआइतिख्यात॥आतर्पणामपियनइतिप्रसिद्धं॥चेंद्रएनचिताचक्रंचक्राकाराचिता

वात्यावर्वडशइतिख्यताकीकसंअस्थि॥धुमंलातीतिधुमलः॥धुमवाशाक्वचिन्नैमिरान्द्रमेतिपाठः॥

तत्रतिमिरस्येदं।तैमिरंतैमिरश्चासावुद्भमश्चेतिसमासः॥सएवधुमस्तलातीतिकः पश्चालुथ

ह्लन्नावृत्तेनसहकर्मधारयः॥कथहोलोहभांड॥कटाहोघृततैलादिमर्जनेमहिषीशिशार्वितिविश्वः॥।

अनुकारातुल्याश्वित्रतंश्वेतकुष्ठयोगिचित्रितंमितिपाठेसंजावचित्रमिवयार्थः॥उछ्वासउछ्वासन

वास· ८

८२

82

संश्लेषआलिंगनं॥ वक्रमुखं॥ पक्षेदीर्घोछ्वासआपिका या महापरिछेदः॥ तदुक्तमुत्तरतंत्रे॥ आख्या

यिकायाः परिछेदआख्यासोछ्वासकावपीति संश्लेषः संप्रयुक्तकाव्यालंकारविशेषः॥ तदाह दंडी श्लि

ष्टमस्पुष्टशैतिल्यमिति वक्त्रं छंदोविशेषः॥ तल्लक्षणंतु वृत्तरत्नाकरे॥ वक्त्रंनाद्यान्नसौ स्यातामब्धे

र्योनुष्टुभिख्यातं॥ यद्वा समानपदमभिधेयत्वेन वक्रशब्देन मुखाख्यः काव्यसंधिरुच्यते॥ तदुक्तं॥ मु

खमारंभोगर्भैरिचनानिबर्हणं॥ मिष्टसिद्धिश्च॥ इति काव्यं अशात्रयमंगोपांगान्वितं भवतीति॥ अखि

यतखेदं जगाम॥ कालपाशेन रात्रिरूपसमयपाशेन शय्यामयपाशेन वा॥ विजघटे विघटितं॥ चक्र राम ८२

वाकयोर्लीढित्वात्॥हृदयपाटनेनसामंपपाट॥अटपटगतोजगामेत्यर्थः॥कुमुदिन्याःपार्श्वेसं
चरंतीभ्रमरमालाहिमकरदयितस्यसंबंधिनीहृतीवलक्षितेतियोजना॥संचरंतीत्युत्रहृतीयायो
गाभावान्ननतङ्॥ककुभेदिशाव्यरूदंन्नितिबाष्पबिंदूनांतारकाकारतयांत्रापात्तेरोदनंविवक्षितमु
र्मुरंतुकरीषाग्निरित्यमरपाठान्मुर्मुरशब्दोनपुंसकोपि॥श्रुतिवचनवेदरूपवाक्य॥दिक्काष्ठा॥
अंबरमाकाशं॥पक्षेदिगंबरस्यशंकरस्याहंतोवादर्शनंस्थितिः॥वेदेहिक्वचिदीश्वरनिराक
रणांक्षपणाकपक्षयश्च॥स्तुयएव॥राजपदोरउटीतिप्रसिद्धः॥शार्वरगाढांधकारः॥शार्वरत्वंघत

मसे शार्वरो थातुकन्पवदिति विश्वः॥ यद्वा शार्वरि शार्वरी भवं॥ तदिह नारकादीत्सुपवर्गपुतरंध
कारं वर्णयता शार्वर्या अतिगहनत्वँ सुचितं॥ व्यंजं भतेति प्रकाशमासाद्यादित्यर्थः॥ क्षणेन चर
जनीपतिरभ्युदयमाससादेत्यन्वयः॥ कंदुकोगंडुकः॥ लवं गैतिपाठे लवं गोतव मंदारः॥ मंदा
रः पारिजातक इत्यमरः॥ बालत्वेन मंदारस्तवकस्यातिलोहितत्वध्वनिः॥ दिव्येति दिव्यवधं
या प्रसादयति सेत्यर्थः॥ कार्त्तयस्वरं हिरण्यतुणो बाणाधारः॥ तस्करः॥ समानः पिंडसांद्रव
ले काले तुल्येपि परिकीर्तितमिति विश्वः॥ पूर्णपात्रं वस्तुपूर्णपात्रेवर्द्धीयकोचति विश्वः॥ स्तना

भोगस्ततमर इति रत्नकोशः॥ आखंडला शा प्राची॥ इह चंद्रवर्णितप्रस्तावे पत्रैव शब्देन श्रूयते तत्रा
क प्यंतभूतः सबोद्धव्यः॥ क्वचित्तु सर्पमेवालंकारो द्रष्टव्यः पाटितः अट्टपदागताविस्यस्य प्रयोगं गमि
तइत्यर्थः॥ लीढ आस्वादितः॥ क्षणादां करोतीति क्विपि क्षणादाकृच्चंद्रः॥ तस्य अनंतरं ग्रहपतिसंज्ञा
गामेतिसंबंधः॥ ग्रहपतिश्चंद्रः उर्ध्वं ययौ॥ व्रजांगना गोपिस्त्रियः किंकः पिंडः॥ पिष्टकस्य विकारे पि
स्त्वस्तिकोरतकीलके इति विश्वः॥ छायया दीप्त्या मुद्रितोंकितः॥ दंतस्य हस्तिदंतघटितमुष्टेः पा
लिप्रदेशः चैत्यं देशरीतिख्यातं चैत्यमायतने बुद्धगृहे चोद्देश्यपादय इति विश्वः॥ अंधकारिः

शिवः॥ संकल्पजन्मा कामः कालएवोरगः कृष्णोरगो वा॥ कंबुर्नावलयेशंखेइत्यमरः॥ पारदोर
सः कलंको दुर्वाप्रवालस्थानीयः॥ भग्नसंतत्वेन गोमुंडस्य वर्त्तुलत्वेंधत्वात्॥ गोधुः मःश्रीहि
विशेषः तच्छालिनस्तत्पुरुषस्य क्षेत्रे सीमानिर्णयार्थं रक्षार्थं वा गोमुंडमारोप्यत इति समाचारः
मलयजं श्रीचंदनं सरसं सद्यवलितं पुंडरीकं श्वेतपद्मं सैकतं सिकतामयं बीजपतेनेनेति बीजतं॥
व्यंजनमेव॥ अत्रांतर इति॥ अत्रांतरे गंदानंदकंदे चंद्रोदयावसरे अभिसारिकाणां सार्थेन प्रेषि
तानां हतीनां प्रवादः प्रकृष्टवैदग्ध्यादिप्रधानावाचोबभूवुरित्यन्वयः॥ प्रियतमानुप्रतिवल्लभा

न्लक्ष्मीकृत्यकीदृशाः द्व्यर्थीः॥उपालंभावर्जितरूपार्थद्वयोपेताः॥सप्रपंचाः प्रतारणात्विताः वि
कारभंगुराः विकारैर्नीरी॥विपर्यासेमन्मथजंत्यैरन्यथाभावैः काकुभिश्च भंगुराः वक्रभंगीप्र
धानाः वृक्षाक्रयइतियावत्॥अभिसारिकेति॥अमरेतु कांतार्थीनीतुयायातिसंकेतंसाभिसारि
केति॥तत्रकंदर्पदर्पसमर्पकरजनिकरजनितकरकरोदयसंज्ञाताम्भिसाररणारणाकयाकयाचि
न्नरयकयाप्रेषिताकाचिदुतीनविकांतारानुरक्तंकंचिन्नायकमवलोक्यतमुपलाभते॥अव
स्त्रीकृतमित्यादिहेनायककयाचिदुष्टयाचिदुष्टयाधनमात्रार्थिन्या॥अवस्त्रीकृतंवासोहीनता

वास टी
८५
85

मायादितमात्मानं त्वं तत्त्वतः सम्यक्नाकलयसि॥ नजानासि नग्नासि त्वं सांप्रतमिति भावः॥ पुनरा
हयतस्त्वमिदानीं नग्नात एव नो पुरुषस्त्वं स्त्रीकृतं नारिचरितं तत्त्वतः स्वरूपेणाकलयसि जाना
सि अतः आत्मानिजप्राणानू अवरक्षय यात्वं नग्नीकृतस्तया पाणा अपि ते गृहीतव्या इति भा
वः॥ यद्वा कार्मणेन तया स्त्रीत्वमायादितनात्मानं तत्त्वतः परमार्थेन न जानासि॥ अतस्त्वं अ
वरक्षय यावत्स्त्रीत्वं कृतं तया अपरमपि विनाशादिकं ते कर्तव्यमतस्तत्प्रतीकारं चिंतये
तिभावद्युपलंभः॥ अथवा वर्जनं स्त्रिमत्सरव्यैकृतं स्वीकृतं अर्थीस्ते मम अवपालय॥ यतस्त्वं

राम
८५

नापुरुषं आत्मानं त्वनं त्वतो याथार्थ्यात् ॥ कलयसि ॥ जानासि ॥ इयमबला त्वं बलवानतः मां
निजावष्टंभेनाभिसारयेदिति भावः ॥ यद्वा स्त्रीकृतपुरुषावितेस्त्री त्वया सादिनमात्मानं सित
त्वतो बंधत्वात् ॥ सुरतबंधादिनियावतः ॥ अवप्रीणाय महसख्या सहेति शेषः ॥ नाकलयहे नाम
स्यवसर्गस्यवलयो भावः पुरुषापितेस्वर्गाभिमानिनित्यर्थः ॥ सितत्वत इति षिञ् बंधने क्तः ॥ सि
जं तस्य भावः सितत्वं बद्धत्वं ततस्त्वं सि प्रत्ययः ॥ अस्मिंस्तु पक्षे एकतकारवान् तत्वशब्दः ॥ सरोसरि
सवर्णे इति तकारलोपविकल्पादित्यवधेयं ॥ यद्वा स्त्रीकृतं महसख्या मानिन्या यदोपराधादिकं

वास टी
८६

कृतंतद्दवपालय।।मानायनोदत्तप्रकारेणानामादिकमपनयेतिभावः।।अन्या आहकाते
ति।।हेकांतकस्यसुखस्यांतनाशकहेप्रस्तरइवपाषाणइवक्रूरेसिकरितोसिनिष्ठुरहृद
योसीत्यर्थः।।तत्रापिनपुराकर्षकचुंबकद्रावकेषुमध्येएकोपासिभ्रामकोसिपरंकाम
कलाकौशलनयानारीमाकर्षतिसआकर्षकः।।सुतव्यापारकुशलतयायानारीचुंबतिस २
चुंबकःऔषधविशेषयोगेनकुचादिमर्द्दनेनवाकठिनकामिनीयाद्रावयतिसद्रावकः।।
अन्यासक्तान्यकामिनीचित्तंयोभ्रमयतिप्रतारयतिसभ्रामकः।।इतितावकपक्षपाषाणाप राम ८६

सत॥ अकर्षकोऽयस्कातमणिः यस्यदर्शनमात्रात्लोहभ्रंगाल्निःसरति॥ चुंबकोयस्संबंधा
ल्लोहंभपगच्छति चेबकः सुर्यकांतोवासुर्यकरस्पर्शाद्यस्मादग्निस्स्रवति॥ द्रावकोयस्संबधा
ल्लोहस्यद्रवरूपताभावति॥ यद्वाद्रावकश्चंद्रकांतः यश्चंद्रकरस्पर्शात्द्रवति भ्रामकोमंगुरिअ
इतिख्यातो[illegible]यस्संबधाल्लोहंभ्रमतितद्वत्॥ लौहंचारस्त्र॥ चुंबकोभ्रामकश्चैवाकर्षकोद्रावकस्त
थाएकाद्वित्रिचतुःपंचषण्मुखाःसंभवंतितेइति॥ कसुरवपि प्रकीर्तितं॥ इत्येकास्करः॥ क
र्कशंकठितकुरंकठोरंनिष्ठुरंदृढंइत्यमरः॥ इ[illegible]त्युपालंभपक्षे॥ अथावर्जनं॥ हेकांतकमनीय

वास· टी·
८७
87

नैवपस्मारइवनिर्दयेसिकिं। नुआकर्षकचुंबककद्रावकाइववोबाणाः यस्यसकामः तद्वदेकः
श्रेष्ठोसिअतएवपरमार्थितस्याः यत्सख्याः भ्रामकोमोहयितासिकंदर्पसमतयातांमोहयि
त्वाकथमधुनाविह्वलांतांनानुगच्छसीतिभावः॥ एकोद्वितीयश्रेष्ठचेतिविश्वः क्रूरैःकठिनैर्निर्द
याविति च॥ उपालंभपक्षेचकारः पुनरर्थेइहपक्षेचकारोवधावधारणोबोद्धव्यः॥ इतराप्रा
हकितचेतिहेकितवधूर्तधर्मार्थमन्येनप्रयुक्तोयः क्षेपणिकोनापिकः सइवत्वमसि॥ की
दृशः मुधावाहिततरंप्रवर्तितसंतरणांवारिजलंयेनसतथाकस्याश्चिद्दासाध्यायाः कृतेजला राम ८७

२६

दिङ्गमपिनापेक्षस्य इति भावः॥नोविकपक्षेमुधानिःफलवाहितं नरार्थीसारराणार्थवारिजलं
येनस तथा तत्रस्वामिन एवधर्मोभवजिनतस्ते वकस्यनाविकस्येति भावः॥ तरइतिनरणांतर
भावेघञ् विकल्प्येनवृद्धिः॥यद्वासकलकामकलाकुशलां मह्यं स्त्रीतरिरस्कृत्यानादृत्तींतांत्वंयज्ञ
तोसितात्वंमुधानिफलंवाहितोधृतसारवारिःखडगोयेनस तथा यथा जलादिफलविनाखडगोवृ
थाध्रियति॥तथा तदपित्वयाकृतमिभावइत्युपालंभः॥अथावर्जनं॥हेकृतवविग्धहेधर्मार्थधर्म
प्रयोजनमुधावाहितहेमुधानिःफलभावोवनं रक्षणांअथीतुपृथिव्याःयेषांतेमुधावाःएतादृशाआ

वास टी

हिताःशत्रवोयस्यतादृशोहेअन्यप्रयुक्तक्षेपणीकहेअंन्येनशत्रूणांयस्यप्रयुक्तंतत्क्षेपणीकता
८८ शाकहेतरवारिरिवखड्गइवत्वमसितीक्ष्णाइवशेषः॥तदेवंविदग्धतयातीक्ष्णातयाधार्मिकत्वे
८८ न नशत्रूंजेतृतयासाधकत्वेंचत्वतःसर्वार्थसिद्धिरिति॥रमह्रस्वखौसमाजःकथ्यनाराध्यतइतिमा
वःक्षेपणमस्यास्तीतिअतइतदनावितिठन्कितवोधुतकृद्यूतविदग्धेषुनिर्गॅ[redacted]तइतिधरणिः॥ द्य
नौकादंडःक्षेपणीस्यांदरित्रंकेनिपातकइत्यमरः॥क्षेपणीकेरुआरइतिप्रसिद्धः॥सोस्यास्ती
तिक्षेपणीकः॥मुधातुनिःफलवृथेत्यमरः॥तरवारिमतःखड्गइतिधरणिः॥अपराआहस राम ८८

खेदमिति॥ तूष्णींस्थिते नायके सतिवचनमिदं सखेदमिव सकष्टमिव मनसा दुर्लभं जनं मे गंमसख
खीविघ्नंतं सखेदकष्टसहितं मनसा चिंतयसीव॥ इवेशब्द उत्प्रेक्षायां॥ यद्वा॥ सखेदं सकष्टं
यथास्यादेवं जनं कंचिद्युवतीजनं मनसा विदुर्लभमिव चिंतयसि यदि नायिकांतरप्रहितदूती
समागमनं सा जानीयादिति तदा मनसापि मम दुर्लभमाभावेदिति भाइस्तु पालंभः अथावर्जनेसखा
सुहृत्यइदकामदंलोके दुर्लभं विरलप्रचारं जनं मनसा चिंतयत्वं मनसीव॥ मत्सखीपरंतव
कामप्रदातस्तामनुसरेति भावः॥ यद्वा हे सखे मित्र हे दमिव त्वं मनसा तज्जनं मत्सखीं दुर्लभं चिं

भां

तयसियथाभार्यादुर्लभपदार्थंस्वामिनोदोषमुद्भावयन्ति॥तथात्वमपिममसखीदोषंदुर्लभतया
प्रकाशयसीतिस्त्रीतुल्योभवेत्युत्तेजनं॥इः कामः तंददातीतिइदः अतोनुपसर्गेकः इकारउच्य
ते कामः॥दक्कलत्रेबुधैःप्रोक्तमितिव॥अपराश्चाह॥सत्वसारेतिनुःपुनरर्थेसपुनः असारच
रितः सारोबलंतत्कृत्यचरितः योरिपुमंडलाग्रतः सपत्नीसमुहप्रत्यक्षतोनिर्वृत्तिं सुखमुपे
त्यगत्वालब्धाबतिष्ठतिमुखदाक्षिण्यंकरोतिनतुसर्वत्रतुल्यानुरागोभवतीतिभावः॥यद्वायो
रिपुमंडलाग्रतः सन्नुखडगान्निवृत्तिमक्षततांप्राप्यतिष्ठतिसक्षमान्वितोढअरिरौवभार्यइति

भावः॥यद्वा येऽरिपुमंडलस्यशत्रुदेशस्याग्रतोऽग्रेतेइतियावत्॥निवृत्तिंडीक्किकामुपेत्यतिष्ठतीत्यु
पालंभः॥अपावर्जनं॥साहसिकतांस्तौति॥यःसत्वसारंसात्विकताप्रधानचरितंयस्यएवंवि
शिष्टःसरिपुमंडलाग्रतःशत्रुसंघाग्रतोनिवृत्तिमयाभावगत्वातिष्ठतिशत्रुभ्योनभयंकरोतीत्य
र्थः॥अतस्त्वमसात्विकतांमागाःमहासत्वंत्वमसीतिमहत्त्वस्वीकृत्यास्यादितितिभावः॥अनेनश्ले हत
षेणासरोसरि॥सवर्णाइतिविकल्पेनतकारलोपेसत्वशब्देयमेकातकारवानेवेतिज्ञायतेइत्यव
धेयं॥कौक्षेयकोमंडलाग्रःकरवालःकृपाणवदित्यमरः॥मंडलंदेशसंघयोरितिविश्वः॥निर्वृ

वास दी
९०
90

तिसुसुखेजीव्येअभयेअक्षयेंचतिधरणिाः॥अन्याह॥सखल्विविखलुनिबधेसनवीरःशूरःय
प्रतिपक्षस्यशत्रोःकृतेस्वभानानुरक्तेतरनायिकायाःसंप्रहार॥तःतालतन्नकुंजरानुकेशान्न
यति॥गृह्णातिउत्पाटयतिवाधातोरनेकार्थत्वात्॥यद्वायःप्रतिपक्षस्यशत्रोःसंप्रहारातेकुंपृथि
वींजराजीर्णतांनयति॥प्रापयतिदुर्गादिनाजीर्णतांनयतीभावः॥सनिश्चितंवीरः॥विनगताइरा
पृथिवीयस्यसतादृशः पृथिव्यावाचिपानीयेमदिरायामिरमतेत्यमरः॥खलुशब्दोवधारणे
सएववीरःशूरोयःसंप्रहारतोयुद्धात्प्रतिपक्षस्यवैरिणःकुंजरानुगजान्नयत्याकर्षयति॥यद्वा राम ९०

सखलुवीवःविशेषतद्वीरकःप्रेरकःयःप्रतिपक्षस्यसुरतसंमर्द्दःपरस्परमिलितयोर्स्वस्यसंप्र
हारतःतालनमेदात्कुंजरान्केशान्अर्थात्कामिन्यानपरिगृंह्णाति॥केशग्रहणांसुरतेतु
बभादौभवत्येवतथाचजयदेवःसकचग्रहचुंबनदानमितितद्दृतेनअर्थाद्भयेनश्मूरत्वकामुक
त्वेसुचितेअतएवमत्तसखीमनुसरेतिभावः॥कुंजरानकयकेशेइत्यमरः॥खलुस्यात्प्रतिषे
धेपि॥तुनिश्चयेप्यवधारणइतिविस्वः॥संप्रह्रियतेस्मिन्नितिसंप्रहारोयुद्धंतथाचमरः॥संप्रहा
राभिसंपातकलिसंस्फोटसंयुगाइति॥अपराआह॥धृतेत्यादिहेधृतेक्रमकुरसापराधतया

वास टी
९१
91

धृतबकुदंडवालसंचयः बालस्याक्षस्यसंचयः संग्रहोयस्यतादृशः परंयथास्यादेवमकांडएव
सहसैवविग्रहेणाविरुद्धनिर्बंधेनसंपतन्नुसम्यक्पातित्यंजनंतुमहापदंमहदस्थानंलभतेप्रा
प्नोतिअज्ञसमाजादस्थानाभिनिवेशात्कार्याकार्यंनजानातीत्याशयः॥अतस्त्वंनामहात्यजस
त्सखीमनुसरेतितीत्यर्थः॥अपिः संभावनायां॥यद्वाधृतः गुरुः करेण॥वालसंचयः बालस्याल
स्यसंचयः केशपाशः चुंबनार्थंयेनतादृशोपि॥अकांडएवानपराधप्रस्तावएवपरंसंपत
सपत्नीजनंगच्छन्तुभवान्महापदंमहतीविपत्तिंविग्रहेणशरीरेणलभते॥नातिरस्कृत्यसु राम ९१

३०

स्वी भवेत्यर्थः॥ यद्वा धृतउवोः करयोर्वीणानां च संचय आधिक्यं येन स नादशो पि अस्थान एव परिशत्रुं
सपतन्तमभिववन्नु॥ विग्रहेण॥ युद्धेन महाविपत्तिं लभते॥ अकांड विग्रहाशुभोदर्क एव भवतीति भावइत्यु
पालंभः॥ अथावर्जितं॥ धृतः उरसि महानुकरवालस्य चयोसि संचयो येन सः परमकांड एव दुर्निवारशो
र संपात एव संपतन्तमभिमुखं गच्छन्नु विग्रहेण॥ यद्धेन पहापदं महतीं पदवीं त्वमते प्राप्नोतितस्मात्साहसं स
र्वप्रकारेण॥ चितं॥ तदुक्तं नहि साहसमनारुह्य नरो भद्राणि पश्यतीति॥ अन्या प्राह॥ राजस इत्यादि॥ राजसे
रजोविकारे सति अनवहितोऽमनुष्यानुकूलं स्वं न राजसं गुणास्तन रहितत्या मनोरथं पुरयय तो न रहितो

बास टी
९२
92

मनुष्येष्वनुकूलोसि त्वं॥सा त्वदनुरक्तै कचित्ता त्वं तु दयालुरतो युवयोरनुराग उचित एवेति भावः॥गुणास्सत्वं
रजस्तम इत्यमरः॥रहित इति रहस्यगोप्तः ध्रुवं तु निश्चितेतत केनिश्चिले शास्वतेन्यवदिदिति विश्वः॥काचिन्ना
यकं सुवंती नायका धीनां सुसखीं प्रतिपादयंती प्राह विशारदेति॥हे श्वि शारद विगतसरस्वतीक विशार
दाभ्रं विशिष्टशारन्मेघः॥तद्बुद्धिशादेनिर्मले अविशल्सविष्टी भवदात्मनीन मात्महितं महिमा महत्त्वं अन
नमानाः प्राणाः सह उत्सवः तद्योगीयोमानः तेषां रक्षणाक्षम [illegible] योग्यं पश्चात्तद्रूंसंबंधे॥अतादृशा हे अक्षमा
तिलक अपक्षांति मुषणा तव धीर्बुद्धिः रतासंसक्ता केवलता धिरिव सुरतमनो व्यथेव मनसि चित्ते अन्न इव शब्दो

राम
९२

३९

धी

ध्याह्वार्यैः यद्वा तव मनसि अँरता धैर्यै वर्तते कीदृशी धीरता धिया सह रता संसक्ता तथा च तव चित्ते बुद्धि
मधिरूढमधैर्यमित्यर्थः तथा तव वचसि अमृतना ऽसत्वता स्ति कीदृशी मृतता मृवितता स्त्विस्तीर्णा अनृतान
दमिद् धासि अन्यास्त्वितयसीत्याशयः॥ शारदे इति सरस्वती स्तवः आत्मनीनमिति आत्मने हितमित्यर्थे आत्मन्
विश्वजनभोगोत्तरपदात्खइति ख प्रत्ययः॥ आयनेत्यादि सूत्रेण ई ना देशः इत्युपालभः॥ अथ वर्जनं॥ हेक्षमाति
लकमुमुषगा तव मनसि धीरता स्ति कीदृशी विशदो धिया रता बुद्धि सहिता तथा विशारदा विचक्षणा पुनः कीदृ
शी विशिष्टशारत्मेघवदुज्वला पुनः कीदृशी विशदोऽनवसन्नः आत्मनीनो महिमा यस्याः सा तथा॥ विशदइति शा

वास ठी

९३

93

नु श्रातनेच मृदीर्घत्वाभावो बहुलवचनात्॥ पुनः कीदृशी अनाः प्राणिनः महीतेजस्वी पुरुषः॥ तयोर्मीन
नरक्षसोऽक्षमातधातववचसि मुततास्वतासि॥ कीदृशी भुमैततावि सीणातदेवं धीरोसि सत्यसंधोसि ततो
मत्सखीवच्छिन्तंपुरयेत्याशयः॥ मुतंन्यायेपि शाचादौ मुतं सत्योपमानयोरिति विश्वः॥ केचित्तु विशारदेत्यादि
सखीविशेषणं कृत्वा हे धीर पंडितनास्तादृश्येया धीरता धौर्याणि मनसि हे मुतन्याप्यतास्तादृश्यो मुततः सत्य
ताः वचसि तवेति योजयित्वा च युवयोरुक्तेनानागुणावतोः समागमो योग्य एवेति प्राहुः॥ अपराह्न॥ साहसेनेति॥ सा
वि मत्सखीआह्वामिति शेषः॥ हे सेनस नाथपरायत्त सातव कोप्रियाहु सेनहा स्यनकमलासुख आरुपिनीर्क राम ९३

३२

सुखं मलतीति कमला मल मह्ल धारणोकमीशयणाव्. द्याभा वो बाकुलत्वात्॥यद्वा मलनं मलः भावे घञ्कस्य
मला धारपिनीतथा च हास्य मात्रेण सुखदा न तु सुरतादि सुखदेत्याशयः॥कीदृशी कमला पद्माधन माने लु
ब्धा जिता सोदयी दिनामस्त्र ख्यातिशेषः॥परा अन्या नात्मनी नेति॥यावत्॥अजितान जितं जयो यस्यां सा॥
तथा न कस्यापि जेत्रीत्यर्थः॥हसइतिस्वनहसोर्वेतिवा अप्रत्ययः॥कमला श्री हरिप्रियेत्यमरः॥जितम्बि
त्तिजी जये भावे क्तः इत्युर्व्लिंमः अथा वर्जितं सा मस्त्र खी आह॥सहे सहस्यइनूप्रमोहे सा हसे नाभिसारस्
पेणाशरीरानपेक्षकर्मेणात्लक्षिता स्ति॥कीदृशी कमला वरश्रीलक्ष्मीववा॥कमलानुवरस्त्रियामितिशाश्व

।

तः॥आकमलाअत्यर्थधनवतीआसमंतात्कमलायरयाः सातथा॥परा श्रेष्ठाआजिताईषज्जितातुयेवे विवि
शेषः॥कामकलाकुशलतयाह्वपापर किंचिज्जिता॥नान्यैरिति भावः अतएव परैरन्यैः पराभिः स्त्रीभिर्वा सां
दर्यादिभिः रजिता॥यद्वासामहृसखी साहृसेन लक्षितास्ति ययाकमलालक्ष्मीः आहृसेन ईषद्धासेन पराजि
ताशेष पूर्ववत्॥अन्याप्राह॥सात्वदर्पणेत्यादि॥साकाचिन्ताव प्रिया॥अत्वदर्पणान त्वयि कृतार्पणा॥अद
र्पणाकार विमलाशयाअनादर्शि स्वच्छाभिप्रायाअशयाब्रुनिर्जितकिशलयानकरपद्माभिमुतपद्म वा
असलयालत्यक्ताअंगुलिविभ्रमेणासंज्ञादानातु विभ्रमेणाभ्रात्यावेः पक्षिणोभ्रमेणावागवाक्षशालाकाविव राम ९४

रंध्रप्रति विलोकयंती जालमार्गेण पश्यंती विलोकयंती विधलोकानुपृछंती आस्ति ततस्तामेवातुसरकि मन्त्र
कोबीति भावः॥ दर्पणो मुकुरादर्शौ विल्व मरः॥ स्याष्टला कापि मदनसारिका शल्ययोश्शरेकछत्रेपंजरका
धै ष्ठ्यां च शाला कागदितां बुरितिविश्वः॥ इत्युपालंभः॥ अथावर्जनं॥ सांत्वदर्पणात्वयि अर्पणामात्मा समर्पणां
स्याः दर्पणाकरोवि मल्लः॥ आशयो यस्याः॥ शायाब्जेन हस्तपद्मेन न जितः॥ कि शल्ययो यया तादृ तादृशी
अंगुलिविभ्रमेणांगुलिविलासेन सलयासन्त्याप्रतिगवाक्षशालाकाविवरं सर्वेदुष्टजालरंध्रेषु विभ्र
मेणावेरिव भ्रमो विभ्रमेणांगुलिविलासेन सलयासन्त्याप्रतिगवाक्षशालाकाविवरं सर्वेष्टजालरंध्रेषुवि दु

भ्रमेणावेरिवभ्रमोविभ्रमस्तेन विलोकयंतीयच्छयंती॥ यथा पंजरस्थपक्षीप्रतिशालाकाविवरं चंचुं निक्षिपति
तद्वत्स्वच्छपंतीत्यधीः कीदृशी विलोकयंती विलोकं पक्षिलोकं शुकादिकं यंती● आचक्षाणा पृच्छंतीति यावत्तु
अस्मितदेवं सा गुणवती त्वद्दर्थिनी त्वद्विरहदूदीना अनुग्राह्येति भावः॥ विलोकयंतीति विग्रहे॥ क्वचिद●
सामर्थ्यं प्यसुयें पश्याराजेदाराइतिवत्तु सा मासः सुपूसुवेति सुत्रेण॥ यद्वा विभ्रमेण विशिष्टगमनेन तत्जा
लमार्गरंध्रं पश्यंतीति याज्यं॥ अपरा प्राह॥ सा त्वयेति त्वया अविनामषेणाग्राम्यल्लान्मेषतुल्येन विना
अंतरेण सा तव कापि प्रिया सायंसंध्यायां दुःखान्यनुभवंत्यस्ति॥ ततस्तस्या एवस्थानं गच्छत्वं॥ अन्वय

द्यपि सेति पुर्वमप्युक्तं तस्यापितन्स्यां करणाद्योवनायपुतः सर्वी नाम्ना परामर्षः इत्युपालंभः ॥ अथावर्जितं
त्वया अविना रक्षकेण विना सा महत्सखी सायमवसादमनुभवंत्यस्ति ॥ दुःखानि दुःखयुक्तः प्राणाय यथास्य दे
वं तथा च तयावराकपादश्रामीदश्राप्रसकल्पेति संप्रतित्वमेव शरणमिति भावः ॥ अविनेति अवरक्षणे
सविधातु इत्तु इती प्रत्ययो वाकुत्सकः सायमिति सातंदं सायः शांतकर्मणीत्यसघुः आदेच उपदेशे शि
तीत्यात्व अन्तो युक्त्विणाकृतोरिति ॥ युक्ति च साधु अननं प्राणानमनः ॥ तद्योगितोऽनितः पश्चात्समासः किं
पुनर्मिसरायणा सती सखी नामग्रेति ८ ।तीति नायकवचनमाशंक्यापरा प्राह ॥ जीवीति हे जीवनायक

जीवनाहरराकरजीवनायकेजीवनोदेयस्यसुखेजनास्त्वामिहलोकेनाश्रयति॥सुभगमुचितंयथास्यादे
वप्रशस्तसुखविसुखेत्वयिसुखार्थिनामप्रवृत्तिरेवेतिभावः॥नायकोप्रापकोमतइतिनानार्थः॥जीवन
स्यअयोगमनंज्ञानमितियावत्॥यस्मात्तादृशंकंसुखं॥यद्वाजीवनायजीवनार्थंसुभगकेसुखतिमित्तं
नाश्रयंतीतियोज्यं॥यद्वाजीवनाआजीतीवतीसतिकाप्रि[illegible]यास्तांवियोजयित्वाहेआपकभ्रमराशील
जीवनायजीविकायैकेकत[illegible]मेजनाःइहजगविनाश्रयंतिनसेवंतेअपितुसर्वएवतथावत्वांसाप्याश्रि
तवतीजीवनमात्रार्थिनीनतुस्निग्धतयेतिभावःइत्युपालंभः॥अथावर्जनं॥जीवआयष्मान्भवनायके

नयपात्र हे जीवनायजीवनार्थी के सुखनिमित्तं सुभगं सुमाहात्म्यं त्वां मिह के नाश्रयति किं त्वाश्रयंत्येवानन्तआश्रितां तां सफलयेदिति भावः यद्वा हे जीवनायक प्राणनाथ जीवनाय प्राणरक्षार्थं के जना इह सुभगं मनोहत्वां नाश्रयंति अपितु स एव जनाः ॥ तथा च मत्सखी त्वदाश्रिता ततस्तां मधुनानुगृहाणेति भावः ॥ अमुमेवार्थं पुरोवर्तिदृष्टान्तेन प्रकटयंती काचिदाह ॥ अन्यास्त इति ॥ हे अंन्यास्त अन्याभिः क्षिप्त अवदअसंभाषक अन्यसतां भवादृशानां दासता मधीनता पुरतः शरीरे अहमेव भजामि त्वं तावदंन्याभिः क्षिप्त एव ॥ सीति भावः ॥ पुरं पुरि शरीरे इति विश्वः ॥ अतो अमे अन्तो मित्रभावादस्निग्धत्वान्मैत्री सख्यमसुभ

यत्तु तया सहतवेति शेषः इत्युपालंभः ॥ अथावर्जनं ॥ अन्ताः प्राणिनः तद्धिता अन्या अस्माक्षिणात्वयेति शे
षः ॥ सा मत्सखी सतां साधुवाक्यानां वदावकी तस्मादहमेव पुरतोऽग्रे दासतां प्रेष्यतां भजामि ॥ तवेति शे
षः ॥ अतो दासत्वान्मैत्र्यतो मित्रभावाद्वत्सलत्वान्मैत्री प्रीतिरस्तु तव मत्सख्या सहेति भावः ॥ यद्वा ॥ अंन्या
स्तावत्स्त्रियः आसतां तिष्ठंतु अहमेव पुरतोऽग्रे मैत्र्यतः सौवृदात्स्नेहतो वा दासतां दासीत्वं भजामि
अतः कारणान्मैत्र्यस्तु ॥ तव मत्सख्येति भावः ॥ मैत्री चेन्माश्रयसे ततः किं मत्सख्यावाऽनिष्टं भविष्यतीति
वृदि निधाय ॥ परा प्राह ॥ अंजसेति ॥ हे अंजनमिथ्यास्नेहामिथ्यांजनकसारतो बलात्मा अन्यति प्रियेतिशेषः

ननु स्नेहादिति भावः॥ अरतः असंभ्यक् संभोगः कुत्सितसंभोगश्च त्वं तत एवं दुर्वृत्तः संन्॥ किं मयि किंचि
त्कं सुखदर्पकं कामं दर्पकम्‌ त्याह्‌ कारं च ननु ततोपि॥ न विस्तारयसि॥ ततोधुना विशेषतो विरुद्धावसा
नुशेषतोत कारानुस्थितमेव मरणांदृढ एवतां शाइत्यर्थः॥ नड्‌बषदर्थे कुत्सायामिति विश्वः॥ कंदर्पो दर्पको
नंगइत्यमरः॥ दर्पकमिति अल्पाख्यायां कन्॥ शेषयतीति शेषोऽधनः॥ यद्वा विशेषतो र्थ्यशेषतः शेष
स्थितमेव मरणामिति योज्यमित्युपालंभः॥ अथावर्जीनं॥ हे अनकांत सारतस्तद्धतः सा मत्सखीतवा
स्तीति शेषः रतोऽनुरक्तस्त्वं किमप्यनिर्वचनीयं कंसुखंदर्पकं कामं दर्पकं प्रशास्तमदं च ननु ततो षिअ

वितुतनोष्येवविशेषतःसुतरांशेषतोंतेनतथाचादितोंतेविशिष्टस्नेहासीतिभावः॥एवंपूर्वोक्तेसतिस्थि
तमवस्थानमरणामकलहमावयोरितिविशेषः॥अंजेतिधातोरबेकार्थतयाऽभिव्यक्तिकांत्योरपि
प्रयोगः॥सारोबलेमज्जेतिचस्थिरह्लेइतिशा॥स्वतःदर्पकइतिप्रशंसायांकन्॥शेषतइतिसप्तम्याः
तसिः॥यद्वाअजस्मरतःतत्वतोयदिरतोस्मिअनुरक्तोभवस्मितदाहेकंदर्पकामतुल्यसारतापिस्थै
र्यादविदर्पकंदर्पकजनकंकंसुखंकिंन्नविशेषतोत्यर्थीततोबिअवितुनतानोष्येवयदिनततोबि
तदाकिंस्यादतआहशेषतःपरिशेषात्तुमरणांस्थितमेवअत्रकिंशाब्दःप्रश्नेअपिशब्दाभिंनक्रमे

यद्वाऽजस्रापरमार्थतोऽरतःसनूसारतउत्कर्षीतु॥कंदर्पकंकामजनकंकिमप्यनिर्वचनीयं
दर्पकंदर्पकरोषितदापरिज्ञेबोडन्मरणामेवस्थितं॥यद्वानत्वतोनुरक्तःसनूकंदर्पकंप्रशस्तका
मंदर्पकंदर्पजनकंननतोबिविशेषणातदाशेषमरणामेवस्थितंइत्यर्थः॥अपरानिंदापुर्वकमुपालं
भंदर्शीयतीनायकमाह॥शठेति॥हेशठअनृजोधियांबुद्धीनांपद्बोधनंशुद्धिस्तद्वशासाधनदुर्गीतद्धने
तियावत्॥हेदुर्बुद्धिउत्कटमसौम्यंकृत्रिमत्वादाक्षिपेषुतैःकटाक्षैरंपांगदर्शीतैःप्रेमहार्यैवेश्याकटाक्षा
नुरागवश्य॥अतएवामहार्यअनंत्यंतस्पधोअसविषमअसमअसल्लक्ष्मीकआविर्भूतप्रकटदास्याच

टीकायाअस्तक्षिप्तस्तेपरिजनाः परिवाराः दानीयाउक्तोचयोग्याइत्यर्थः॥दास्याइतिदासःदानेअर्हि
तिरायतूयद्वाहेशाठधुर्तधियांशोधनबुद्धीनांशोधकस्याकीदृशीबुद्धिरितिजिज्ञासोवायशोधनयशो
मात्रविभुवतथाचनिर्धततनानाविशेषणोनअकामकारितासुचिनाशेषंपुर्वेवदित्युपालंभः॥अथाच
वर्जितं॥शठधियांवञ्चकबुद्धीनांशोधनउज्वलीकरणयशोधनकीर्तिवित्तप्रेमहार्योस्तेहमात्रग्राह्या
महार्यीमहाशयासमातुल्यामौसेलक्ष्मीकावमहस्रवीतिशेषः॥नदास्याउक्तदाक्षैःसमोहनादुष्कटी
कृतेद्रियैःकुटाक्षैरपांगदर्शनैरविर्भूतदास्याः अंगीकृतदासत्वाः परिजना॥यद्वाहेधुर्त्वेमतिशोध

ककीर्त्तिवित्तसामस्तस्वीप्रेम्णांपरंहार्यैर्हिरण्ययानतुद्रव्यादिनायतःप्रहार्यीमहास्वामिनीईश्वर१
त्नीसमस्तसह्मयालक्ष्म्यावर्त्ततेसमाअसमानकयापितुल्यासर्वोत्कृष्टातदातस्मिन्प्रयोजनकालेअस्याः समस्तस्त्र्याः
दुत्कटाक्षैरद्भुतव्यवहारैःकटाक्षैः॥रपांगविलोकनैःपरिसर्वतोभावेनजनाःप्रशान्तःआविर्भूतदास्याः
प्रकटीकृतदासत्वाभवंति॥यस्याःकटाक्षैःरेवसर्वेकिंकरीक्रियंतइतिकलावतीत्वमस्याध्वनितमि
तिभावः॥यद्वापरिजनाःसेवकाःकटाक्षैःरेवसर्वेप्रकटीकृतदासत्वाःक्रियंतरित्यनेनपरमैश्वर्यम
स्याध्वनितंअक्षोभ्यतेव्यवहारेचेतिविश्वः॥नावानरिनारीणांमभिंगतंनकरोत्यंन्यासांतुकरोत्येवेतिम

नसिकृत्वापराप्राहकमलेति॥भवतात्वयाकृतीनामभिज्ञेनत्व्यगतोविरोधमिर्पत्तिगछतिअरिः अवइः तथा
चविरोधवतामपित्यद्वाधातोरनेकार्थतयासघातुःसंघदार्थः तथाचरीणांसंघट्टिनामरीणांशत्रुणां
कमलाश्रीः कमलाकंसुखंमलतिधारयतिकमलासुखधारयित्रीसुखंचनमलितितवेत्यत्रैकशेषः॥त
पुंस्नकमनपुंसकेतिसुत्रेण॥यद्वामलितितच्छब्दे लिंगव्यत्ययेनाचयइत्युपालंभः॥अथावर्जीतं॥कृतिनापं
डितेनचरीणांकमलाकृतिनारीणांक्षीणःकलंकरूपोमलोयत्रतादृश्याकृतिराकरोयस्यतननिर्मलमु स्त
र्तिनाभवतात्वयाअरीणांकमलालक्ष्मीः मुखंमलितितंभेदेनात्वयः॥तथाचेंस्रसादान्महसरस्वाः सर्व राम

महितसेह्स्यस्यतीतिभावः॥यद्वाभवताकमलाकृतिनापद्मवत्सुकुमारेणारीणांशत्रूणांनारीणांस्त्रीणां
मुखंकमलाकृत्यविपद्माकरमविमलितितंम्लानीकृतं॥अत्रपक्षेचकारोभिन्नक्रमोऽप्यर्थः॥तथाचवीर
स्त्वंमह्यसखीमनुगृह्णाणेतिभावः॥अन्यत्प्राह॥विश्वस्येति॥विश्वस्यसर्वस्यविश्वस्यादिश्वासंकृत्वाव्यवस्था
विगतावस्थितिः॥सर्वगतियातु॥असमाअलक्ष्मीकासातवकपियेतिशेषः॥आद्यसमोऽर्दितोऽमावि
षमाअतएवासाद्यंआसादयोग्यंतनुषेकंखल्वरेहंअनेककालसंगीतसंगीतयासहस्रदासर्वदानत्या
दिसंसक्तःस्तनुषविस्तारयसि॥तथाचयाद्गृहीतयान्याप्रियातादृशास्त्वमपिरसज्ञइत्यासयतुपालंभः॥ ३

राम ची

१०१

|0|

तनुषेकः मित्यत्रसमासदोद्योरितिषत्वनिषेधाद्यच्छाब्दतायद्वाषत्वनिषेधविधेरनित्यतयासिद्ध्यतीतिअ
ध्यावर्जितं॥हेविस्वस्यविश्वस्यजगतोविश्वसनीयव्यवस्थासमासाद्यतीतिप्राप्यअसंदीप्ताविन्यत्रसमास
संभ्याभास्वरआद्यंप्रथमंअनेककालसंगीतसंगीचोरसमयन्त्यादिजातमेलापकःअतनुकामःतस्से
कृतस्समेदतनुषेसंगीतगोष्ठीसंगादादभ्यकामवर्धयसीतिभावः॥तदनेनपरमकामावस्थाबीजोद्भा
वनेनतदनुमेयदशांतैरैःसख्याव्याकुलत्वसुचनेनत्वरांकवीतिध्वनितं॥यद्वाविश्वस्यसमस्तस्यविश्वस्यज राम
गतोव्यवस्थाव्यवरःसमासादिसंप्राप्तात्वयेतिशेषःकीदृशीअसमविष्टमयस्यातिक्षिपतिआसमासा १०१

उक्तमेवार्थः ॥ यद्वा असमासेति संबोधनं ॥ हे असमास आसमजनक्षेपक इत्यर्थः ॥ आद्यं प्रथमं प्रयोग
२७ कालोत्पन्नं यत्र कं सुँतनू ॥ अनेककालं संगतिसंगी चिरकालम्‌त्यादि सक्तः स्तनुषे शरीयतनुषे विस्ता
रयसिता ॥ तथा च सख्याः कृते त्वां तस्नेहमभ्यर्थ इति भावः ॥ शरीरचीततनुशब्दः सातोप्यस्ति तदुक्तं शा
बूं प्रकारोस्यात नुस्तनुषा साद्धमिति ॥ अपरा दूती कामिनं प्रोत्साहयंती प्राह अंगेति हे अनष्ट गअनुपा
येयुष्येयुष्यपुसं खिडंगेषु ॥ खिडंगेषु रजा कामरोगेगातरसा वेगेन जातरसा उत्संन्न सं गाअमंदाक्षमंदा
मल्लज्ञा मयराद्भुमंतीपयर्द तीक्ष्णा मुह्यंतिन किंचिद्वेति तव कापि कांतेति शेषः ॥ गोत्रायायेः रंगमिति

नामार्थः॥अत्र पुष्पाशब्दो रातिविकासकत्वेन गौ[redacted]व्त्यारिखिङगपरः पुष्पं विकाशे कुसुमे स्त्रीणां च रज
सि स्मृतमिति विश्वः इत्युपालंभः॥अथावजीनं॥हे अनग साक्षात्काम पुष्पेषु[redacted]पुष्पेषु रुजा॥कामकु
सुमकांडपिडयातरसोऽशीघ्रं जावरसाउ संज्ञानुरागा॥हे अमंद सोसाह अक्षमंदा अक्षेषु चरेरोषु मंथा
रा अक्षराणामनुस्मवंय[redacted]थास्यादेवं भ्रमतिमुह्यतिमस्मरवील्वद्धिरह्यदितिभावः अक्षं स्यादिंद्रिय क्लीबमिति
विश्वः इह्ययोग्य॥तयात्वगिंद्रियं चरणारपमुक्त इदानीसादशामीदशांप्रमकल्पेतितामनुसरेतिता
सर्यीयद्वाहे काम कंदर्पकुसुमशरजनितपीडयाजातरसा कास्त्रीशीघ्रं त्वदर्थीभ्रमंतीक्षणांमुह्यतिअपि राम १०२

वै तुसँदा कीदृशी मंदाक्षेण लज्जया मंदा मंदगा शनिर्श्शैले त्यर्थः ॥ मंदाक्षंह्रीस्त्रीपाल अेत्यमरः ॥ यद्वा मंदाक्षम
दमल्पं यस्यां सा तथा ॥ अत्र विशेषणविशेष्यभावप्रतिकामचारः इति शाब्दिकव्यवस्थायामंद
शादृस्य न पुर्वनिपातः यद्वा अमंतीभ्रमं मिथ्याज्ञानं गच्छतीप्राप्नवतीति यावत् ततः क्षणां मुह्यतिज्ञा
नहीना भवती कामाष्ट मावस्थायां मंच मोवियोगे मतिभवतीति सा पिदृशीता अपरा प्राह कामं
ये धुरेका स्त्री मधुरा अनुक्तटास्यात् तूत्वँतिशेषः विशेषणाद्वार विशेष्यंतिप्रतिरितित्यया द्वात्व यत्यश्य
लाभः ॥ कीदृशेन अधरेणानीचकामधुराया अधरेणाकंदर्पभारानवलं विनामुक्ता नामोक्षभाजा

अरजसां चरजोगुणहीनानां चराजौपन्नौनी रागत्वाद्विशेषकेनलब्धो कर्षणाविशेषकेण विरुद्धव
सानेन मुखेंदुना मुखचंद्रवदताह्लिक गुणप्रसिद्धिना विरुत्युपालंभः॥ अथ वाजीनका स्त्री मधुराध
रेणलक्षितामक्कात्यक्कास्यातु॥ अत्र त्वयेतिशेषः॥ कीदृशेन कामस्यधुराकर्तव्यं तद्धरेण कामभावसं
पादकेनत्यर्थः॥ तथा चरजोराजितानां रजोगुणशोभितानां विलासितामध्ये विशेषकेणासतिशयेन॥ तथा वि
शेषकेया विशिष्टावसानेन तथा तथा मुखमेवेदुर्यीस्यते न चंद्रवदाह्लादकेनेत्यर्थः॥ तथा दृदृशेन त्वयाम
सखीयरत्यक्ता अन्याकायिनत्यक्तेनतिभावः॥ यद्वा कास्त्रीयेतादृशी मुक्तात्वयास्यातु अपितुनकापिअ त

स्तामप्सरवीमनुसरेतिभावः॥कीदृशीमुखेनामुखंचंद्रेणोलक्षिता॥कीदृशेनमधुरेणमधुदायीमतोहृरोच
धरोयत्रएतादृशेनतथाकामधुरायाधरेण॥तथामुक्तारजोरजिःमुक्ताचूर्णसंघःविशेषकंविकंचयत्र
तादृशेन॥अत्रमुक्ताशब्देआवृत्याऽन्वयः॥यद्वारजोराजिःकर्पूरक्षोदसंघःविशेषकंचयत्रतादृशेन॥
तथाविशेषकेनमुखांतरव्यवच्छेदकेनयद्वारजोराजिरनुरागपंक्तिस्वविशेषकेणतत्प्रतिपादकेन
विशेषकंतिलकमित्यमरः॥अपराप्राहतवहृदीतितवहृदिलग्नासुरतेश्लिष्यकाप्यस्तीतिशेषः॥कीदृ
शीकरेणालक्षिता॥कीदृशेनआम्रदिम्नोऽम्लत्वस्याकरेण॥स्यादेनतथाश्वेदबिंदुपपेसोम्राधरेणाअ

वास टी
१०४
105

धारिणा पयोधरेणास्तनेन चलक्षिता॥ कीदृशेन स्तनेन वक्षःफलकस्यां चनेन उद्गमथित्रा वक्षःपलमि
हिलिंगनरूपंतत्रकुसार्थकः तथा आविलातांदुष्टानांकां चनेन सुवर्णेन साकीदृशी जितानाजितप्रा
णा तथा चधनमात्राधीनीप्राणानिरपेक्षा साकापिप्रियास्तेनेस्तीतिभाव अत्र स्वेदः सात्विकभावोपल
क्षणाइत्युपालंभः॥ अथावर्जनं॥ तवहृद्दिलग्नः स्वहृदयसंस्पृष्टापुरुषाइतेन्यदापि मत्सखीतिभावः॥
कीदृशी करेणाहस्तेन लक्षिता कीदृशेन म्रदिमाकरेणाम्रदुलस्पर्शेन तथा पयोधरेणास्तनेन लक्षि
ता कीदृशेन स्वेद[redacted]बिंदु पयोधरेणा स्वेदबिंदुबोधमंविदेवः तरवैपांसितद्वारकेणा स्वेदबिंदुजल म

राम
१०४

धारीरा॥ पुनः कीदृशेन वक्षःफलकाचनेन वक्षःफलकमीवक्षःफलहतस्यां कांचनेन पुंजकेन उरुकबी
कारीत्वात्॥ तुलिताना विलकांचनेतुलितं अनाविलं मलषुन्यं कांचनं सुवर्णायेनतेन तुलितनिर्दोषकां
चनेन अतिगौरत्वात्॥ कांचनतुल्यता॥ यद्वा तुलितनिर्दीवचंपकेन कांचनचंपके हे स्निति विश्वः॥ यद्वा
साकीदृशीतिआविलकांचनेनजितातथाचतामनुसरेतिभावः॥ अथापराइतिस्त्रुसरवीकरुणा भुमि
साधयंती नायकमाह कामदारुणात्यादि हे कामदारुणा मनोरथमिषगमद्वरुणोनेत्रैमदरक्ताक्षसदाम
त्ततयानिर्विवेकया स्मरयय अअन्यांसक्तत्वान्मदकामरमयंतं भुजनत्वां मंवंॐ अयं निहकरुणांमदयं तं

तीपरमानात्मीयशत्रुमुतवा अकमिता रं कुत्सितकामुकं अरं शीघ्रमिदृशमपि मत्सखी वांछति कीदृशीप
३ रमहत्स्वप्रकुंडुः खमिन्नप्राप्तोत्सुपाल्लंमलं मपक्षः ॥ अथा वर्जनं ॥ त्वां मवंतं मत्सखी वांछतीति संबंधः कीदृ
१०५ शं कामस्य इष्टस्य इष्टस्य दादाननतात्रप्रशांसुयि सारकीदृशी अदारुरां कीदृशी अदारां सौम्यं नेत्रयस्या
त्वा कीदृशं स्मरमयकं दयीरुपं रमयं ॥ तमात्मानमिति शेषः मदयं मयातामतुंत्रायशुभावहविधिं ॥ ॥ न
साकीदृशी मद्यंती मतूमतः ॥ स्त्रयंतिगसंकेतस्यानमिति शेषः ॥ कीदृशं त्वां परमकमितितारं प्रकृष्टका राम
मुकं ॥ कीदृशी सा परमकमृति सुखमिता अरं शीघ्रं मित्यर्थः ॥ तथा च त्वं कामप्रदोसीति मत्सख्यास्त्वद १०५

तुगृहे॥ प्रयासा सफला भविष्यतीति तत्र गमनाय त्वरयतिभावः॥ यद्वा कामेन दारुणोन यो मदः तेन अरुणा
लोहितनेत्रयस्याः सा मत्सखी वरमुकुटं मर्कं पायं इता प्राप्ता सती आर्त्तं घूर्णीघ्नं परमकमितारपरमंकांत
वाक्यमिलिविततं कीदृशं मकरध्वरमयकाचिकार अके रोगवाइता अकं पापे च रोगे वेति विश्वः॥ कीदृशी अ
दयनिष्कं परमं यंतमं न्यां मदयंती हर्षयंती मनोवेल्यानतु स्वरूपतइतिभावः॥ अपराह्न हारिरोति ह्वाकु
ष्टं मत्सखाइतिशेषः केन अरिरा॥ सपत्न्या कीदृशेन आह हरिरा॥ मुक्ताहारश्चन्येन असांनं कुंभेन अस्य कु
न चेनत्र अनुदराकं न्येतिवदल्पार्थेश्रुतया रिरा॥ सदाहरा॥ शीलेन कोत्ररिरा॥ निस्तथ्य अक्षिरुचि हरिरा॥ च

वासटी
१०६
106

क्षुः प्रीतिखंडकेन अचक्षुषा अनेत्रेण॥ अत्र नञीषदर्थे कुत्सायां वा॥ आह्वारिणा अभ्यवाहरणमात्रशीलेन
एवंविधे विजने रा मम सखेन सातीवकष्टं गतेति मा वा[illegible]त्युपालंभः॥ अथावडीनं॥ हा कष्टमयि मम सख्या इ
तिशेषः॥ कीदृश्या स्तनकुंभेन लक्षितायाः॥ कीदृशेन रिणा प्रशस्तचुचुकवता अत्रारशब्दस्य चक्र
कोटावपि गौणीवृत्तिर्बोद्धव्या॥ तथा हारिणा समुक्तामालेन॥ यद्वा कष्ट एव स्तनकुंभस्य हेतुः तथा च
क्षुषा लक्षितायाः कीदृशेन हारिणा क्षिरचि हारिणा मृगलोचनकांताग्राहिणा॥ हारिणा मनोहरेण
च॥ चतुषा हेतुनेति वार्थः॥ तथा चलडपेक्षितायाः॥ मम सख्याः स्तनकनत्राभारो द्वहनादिमफलमिति ग
कैकोटिवाचकनयास्तनच

राम
१०६
४५

मतेनतत्समफलयेत्याशयः॥स्तनकुंभेनेयादोर्लक्ष्मणोन्तीयाहेतौवात्तीयाहरिणास्यदं हारिणां हारिणां

च्चतादृक्षिणो चेति हारिणाक्षि तस्या या रुचिर्दीप्तिस्तां हर्तुं शीलयस्या नेन हारिणाक्षिरुचिहारिणोतिन

ङीषदर्थेकुत्सायामल्पार्थेपिप्रकीर्तितइतिविश्वः॥इतिदू। तीसंवादव्याख्यासमाप्ता॥इतिकामचारोहव

सए॥यथायुक्तियथाशक्तियथामतियथागति॥यथाधीतियथावीतिमयमाकारिविचेतना॥इतिदूती

संवादव्याख्यानं॥दुग्धाब्धिवेत्यादिनाचंद्रस्यभुवनव्याप्तिकिरणव्यापारोदर्शितः॥श्वेतद्वीपोनावचं

द्रभुवनंजगद्विश्वप्रामुदे प्रमुदितं॥केमेराचकंदर्पकेतुर्वीसवदत्ताजनकनगरमपासीदितइत्यन्वयः॥वि र

वास टी
१०७
10

घट्टमानविकाशं गच्छत् दलपुटं पत्रसंघातः॥ काननवनं काशो मध्यभागः मकरंदः पुष्परसः सं
दोहसमुहः॥ चंद्रिका ज्योत्स्ना अभिनंदितं श्लाघितपुलिंदः किरातः विषः॥ सांयंतने संध्याकालिने॥ सा
यंचिरेत्यादि सुरे राल्पस्लक्ष्णा॥ तनियसिरवल्ये निभे तुल्ये तमसि आकाशे॥ नभस्वति वाते प्रवहति
सति॥ अनंतरं वासवदत्ताबासभवनसदृशैति संबंधः॥ कीदृशः भवनंदनः शिवपुत्रः कार्तिकेयः
तस्येव प्रभावो यस्य स तथा॥ यद्वा भवतंदनः संसारनंदजननः॥ प्रभावो यस्य स तथा॥ कीदृशं भ
वनं शालवलयेन प्राकाररंसंघेनानुगतकटकं [illegible] जधानी तथा च विश्वः॥ कद केवलये सानो राज

राम
१०७

ह धानीनितं बयेरिति॥ अभ्रन्निह मत्युखै सुधा अभ्रं तंहूँ इति वा एकांतरं एकमंतरीकृत्य रू नकादीनां गो
रत्वस्य सल्लोहिततया देवगणा सादृश्यमुक्तं प्राकारो वरणः शाल इत्यमरः॥ दवशालेउ त्प्रेक्षया॥ पुनः
कीदृशं पाकाभिरूपशोभमानं॥ कीदृशालिः अनिलेभिएवनेन चालिताभिः॥ पट्टागतेपदृसार इति ख्या
तं॥ तत्र प्रसुताभिर्गीताभिः जलयंत्रप्रकारणात्॥ यद्वा पट्टांगने पटांगन समीपे प्रसृताभिः सामीप्ये स
तमीकर्पुरादीनां यो गंधस्तत्र धातं मुदकं तस्य परिमलः॥ सोरभस्तद्वहनशीलाभिः॥ यद्वा कर्पुरा
दिकं च गंधोदकं तेन तु भयपरमलवादिनीभिः॥ गंधोदकं तुल्लोपोसिरं श्रुष्कासु मासिपुक्तकेबालुकं॥

वास टी
१०८
108

उदकंक्वथितं चैव गंधोदकमिहोच्यइतिपरिभाषितं॥गंधशास्त्रेऽतं प्रकरणांतरस्थितमत्रापिद्रष्टव्यंना
गरोमवनेसर्वविधसुखस्यापिसंभावादिति॥प्रासादोधवलगृहंप्रासादपाद्रावतोपयोः सावरणात्
प्रत्यक्षतोज्ञानंनिद्रायमानलोन — गनं प्रमुञ्चयतु कुसुममित्यन्वयः॥अटव्यरण्यंविपिनमित्यमरः॥॥
आमोदवाहिनोभिः नदोभिः तटस्थितकुसुमत्वात्॥संनिहितनानाकुसुमवेदिकाचिरस्थितराजप
टादिकस्फालकोस्त्रीशिलः पट्टः॥नज्ञाताः॥प्रासादायेः ईदृशाः परावतयत्रेवगीकारसारव्यादज्ञान
स्तवकितः संजातस्तवकंकर्पुरराजहंसयोः वर्णसाम्यात्प्रत्यक्षतोजनः स्तवकितंसंजातस्तवकंम

राम
१०८

ती ज्ञतीमसाउन्मज्ञौउँघ्यितावेदिकातीरस्थितराजपट्टादिविरचिताभुमिः॥तद्योमितनः॥सुलितमि
त्यमरः॥कर्पुरराजहंसयोः॥शुक्लत्वान्नभेदप्रत्यक्षं॥किंतुशब्देनानुमानकर्पुरपुरेत्यादिनाविमुत्युत्कं
षींदुदात्तोयमलंकारः॥तथाचदंडी॥आशयस्यवितेर्वायन्महत्वमनुत्तमम्॥उदात्तंनामतंप्राहुः॥अलं
कारमतीषिराइति॥तथाभुतपुलिनस्यासंभवादत्युत्तरेववा॥तदुक्तंतेनैवअतिमितमाकाशमनाले
च्येववेधसाइदमेतादृशंभाविभवत्याःस्नातजंभराम्मितिएवमितिरत्रापि॥राजहंसासुतेचंचुचरणौर्लो
हितैःसिताइत्यमरः॥विकचंप्रफुल्लंप्रकांडमससमयएवदर्शि।ताचक्रवाकस्यतिमिरशंकयाभिःशोभतं

पयस्त[redacted]द्दरामिःपक्षेशोभतस्तातीभिःकीलालंजलंरक्तंच॥कुंभकर्णोघटोपरिभावःपक्षेरावणभ्राता
सुंदरीशोभनास्त्रीस्तस्याःपादपरागश्चरणधुलिस्तेनशबलाभिःचित्राभिः॥पक्षेसुंदरीनामपादपदस्य
योरागोरक्तिमास्तेनशबलाभिः॥सुंदरीस्त्रीवृक्षभेदयोरितिविश्वः॥परागःकौतेरणाभित्यमरः॥
शबलैताश्चकुबेरइतिचंकुल्पोवशः क्रमसिद्धोमात्येवाकुल्याच॥कुल्याल्पाकृत्रिमासरित्॥अयमा
नमिहावेगतमाननादीर्घत्वादिनग्निजयात्॥पुनःकिंभुतं॥प्रासादेरुपशोभितं॥कुतुहलंकुतुकमि
त्यरः॥उपांतेसमीपेसिखिसंहतिभिर्मयुरपंक्तिभिः॥कालागुरुःकृष्णागुरुः॥मुरजोमर्दलः॥नोलकं

डोमयुरः।सामंनदातातुमर्दलशब्देमेघशब्दभ्रमातुवतितंनिबल्लोकानांलोकचक्षुर्यत्रअतिसुंदरत्वेना
तल्लोकैरवलोक्यतइत्यर्थः।पक्षेलोकलोचनआदित्यःपतितोयस्मात्॥दारेषुसीतायामुत्सुकोरामोरा
